ACC. NO. 464
REGISTERED NO. H. 569

श्रीः

Book III No. 4

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

39878

(अभिनवमाला)

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनि सद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ।

पु. ३] कलि ५०६९—प्लवङ्ग—कर्कटः [सं. ४

# THE UDYANA PATRIKA

## A SANSKRIT MONTHLY
NEW SERIES.

262 F. C

अम्भोधिजातः पतिरोषधीनां
सन्मार्गगो विष्णुपदाश्रयोऽपि ।
अम्भोजिनीसम्पदमेष हृत्वा
जातः क्षयिष्णुश्च कलङ्कितश्च ॥

आशुकविसार्वभौम श्रीनिवासराघवाचार्यः

JULY - 1967

Annual Subscription Rs. 3/— Foreign Rs 12/—

## उपकारिणो विद्वांसः

श्री कारप्पङ्गाडु वेङ्कटाचार्यः श्री चिलुक्कूर् वेङ्कटाचार्यः
श्री व. न. श्रीरामदेशिकाचार्यः श्री व. कृ. शेषाद्र्याचार्यः
श्री उडालि सुब्बरामशास्त्रिप्रधानाः [नेल्लूर् वेदसंस्कृतपाठशाला-
श्री ए. राधाकृष्णमूर्तिः [ध्यापकाः

## Editorial Board Members

Sri Vidyalankara V. R. Srinivasa Tatacharya,
Vyakarana, Sahitya, Visishtadwaita Siromani.
„ D. T. Tatacharya, Siromani, M. O. L.,
„ V. S. V. Patracharya, Siromani.

अस्मत्प्रतिनिधी—

**Sri V. S. Ranganathan**, M. A., B. O. L,
त्रिदण्डिमठ - दारागञ्ज्, ALLAHABAD.

„ **D. Srinivasacharya**, Siromani,
17/7, Sadam Wadi, Bhandup, Bombay-78

Editor & Publisher :

**D.T. Tatacharya**, Siromani, M.O.L.,
113, G. South Mada Street, Tirupati (A.P.)

उद्यानपत्रिका ।

अन्या वाचो विमुञ्चथ ।

(अभिनवमाला)

वेदापहारविक्रोशद्वेधःखेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पुस्तकं ३] कलि ५०६९ – प्लवङ्ग – कर्कटः [सं – ४

JULY - 1967

039878

## वि.वि.श्री.

रामराज्यं नाम नाटकं चिरात् खण्डशः अस्यां पत्रिकायां प्रकाशयन्तः स्मः। तत् अस्यां सञ्चिकायां प्रकाश्यमानेन पञ्चमाङ्कचरमभागेन समाप्तिं गच्छति।

अस्य कर्ता महानुभाव एव वि.वि.श्री. इति निर्दिश्यमानः। वि.वि. श्रीनिवास अय्यङ्गार् इति अस्य पूर्णं नाम। अयमिदानीं कीर्तिशेषः। उच्छ्रितः, मृदुगौराङ्गः, वर्चस्वी, मतिमान्, आङ्गलीनिपुणः, संस्कृताभिज्ञः, रसिकः, सर्वमित्रं, परोपकारप्रवणः, महोदारः, विद्वत्पक्षपाती। मद्रनगरे प्रसिद्धो वागाजीवः।

आङ्गलभाषाकविरयं तद्भाषामयीः बह्वीः कृतीः कृतवान्। तासु रामराज्यमप्येका। रामकथानिबन्धारः कवयः प्रायः सर्वे स्वस्वाभिमतरसघटनाप्रक्रियानुसारेण रामायणोक्तं परित्यजन्ति, अथवा विपर्यस्यन्ति, अनुक्तं च निबध्नन्ति। एवं स्वातन्त्र्यमवलम्बन्ते। परं तु सर्वेषां इदमेकं परमं उद्देश्यं यत् श्रीरामो लोकोत्तरगुणोत्तर इति सर्वजनवेद्यतया प्रख्यापनम्। प्रकृते रामराज्यनाटके कविः इदमेव करोति।

0830876

रामराज्यमिति धर्मराज्यमित्यस्य पर्यायः। यत्र उत्कृष्टो वा अपकृष्टो वा यः कोऽपि जनः धर्मातिक्रमं मनसाऽपि न चिन्तयति, अधर्मप्रसङ्गः मनागपि नास्ति, तद् रामराज्यम्। लोके सर्वत्र ईदृशं राज्यं भवितुमर्हति। इदं सर्वैर्जनैः ज्ञातव्यम्। कथं ते जानीयुः। रामायणं पठित्वा श्रुत्वा जानीयुः। इदं प्रयोजनं रामायणनिबन्धनस्य। न कालयापनाय कथाविशेषकथनमात्रम्।

रामायणप्रवचनं भूयिष्ठं सम्प्रति प्रचलति। अथापि उद्दिष्टं फलं नातीव निष्पद्यते। श्रोतॄणां चित्तरञ्जने तत्परा वक्तारः। हास्यप्रायरसास्वादे तत्पराः श्रोतारः। जनानां धर्मनिष्ठायां श्रद्धावर्धनं लक्ष्यीकृत्य प्रवचनकाराः, धर्माधर्मविवेकसम्पत्तिं लक्ष्यीकृत्य श्रोतारश्च यदि प्रवचने श्रवणे च आदरं कुर्युः तदत्यन्तं श्लाघ्यं भवेत्, अवश्यकर्तव्यं कृतं भवेत्।

रामो बुद्धिमतां वरिष्ठः। पिता दशरथः स्वस्मिन् कियदनुरक्त इति स सम्यग् वेद। स्वेन वियुक्तः पिता न जीविष्यतीति निश्चिता मतिः तस्य आसीदेव। तथा गाढो हि तस्य तस्मिन् अभिषङ्गः। पदे पदे तस्य अभिव्यक्तिश्च आसीत्। रामदर्शने सति अहं पुनरपि युवेव भवामीति स्वयमाह दशरथः।

स्वस्मिन् रथमारुह्य वनाय प्रस्थिते, वीथीमागत्य पित्रा कृतं आक्रोशं श्रुतवान् रामः पितुर्विपत्तिर्ध्रुवेति किं न जानाति स्म ? तथापि परावृत्य पितुर्दर्शनमपि अकुर्वन् यद् गत एव आसीत् तेन धर्मप्रावण्यं स्वस्य प्रकाशयति। कैकेय्यै दत्ता या पितुर्वाक् सा वा रक्षणीया पितुः प्राणा वा इति विमर्शे प्राणरक्षणादपि वाग्रक्षणं गरीय इति तस्य सिद्धान्तः।

एवमादितः प्रभृति आवसानं रामचरिते धर्मच्छुरणं विवेकिनोऽनुसन्दधते।

**रामो रामो राम इति प्रजानामभवन् कथाः।**
**रामभूतं जगदभूत् रामे राज्यं प्रशासति॥**

इति वर्णयन् भगवान् वाल्मीकिः किं तावदभिसन्धत्ते? धर्मो विग्रहवान् भवन् रामः स्वदृष्टान्तपरिकल्पनेन सर्वाः प्रजाः परमधार्मिकीरकरोत्। अतो राज्ञा सता परमधार्मिकेण भवितव्यमिति उपदेशं चिकीर्षति। इदमेव अभिसन्धाय इतरेऽपि कवयः रामचरितं वस्तु कृत्वा नानाविधानि काव्यानि निर्ममते। वि.वि.श्री. अस्य आङ्गलभाषामयं नाटकमपि ईदृशं संस्कृतविदोऽपि जानन्त्विति मत्वा अनया भाषया अनूद्य प्राकाशयाम। इदमन्यच्च ईदृशं काव्यं पठित्वा

**दुष्टो दुष्टो दुष्ट इति प्रजानामभवन् कथाः।**
**दुष्टभूतं जगदभूत् दुष्टे राज्यं प्रशासति॥**

इति एवं वर्णने कस्यचित् कवेः प्रसङ्गो यथा न स्यात् तथा वयं विवेकिनो भवेम। तथा भगवान् अनुगृह्णातु॥

## ज्ञानसाम्राज्यभर्ता

(शिरोमणिः ए.वि. कृष्णवारियर्)

तृष्णा नोदेति, शत्रुश्च न, करहरणे नैव चिन्ता, न हिंस्रो
दण्डो लोकेषु धार्यः प्रशमनगहने न प्रयासो विवादे।
दुःखं तापत्रयोत्थं प्रदहति न मनो ज्ञानसाम्राज्यभर्तुः।
कस्ते तुल्यो महात्मन्निति जगति जनः स्तौति सत्यं भवन्तम्॥

जगद्विभूत्यै जगदेकभूतिः प्रसूतिरानन्दघनस्य नित्यम्।
शिष्टावने जाग्रदशेषदेशानटत्ययं लोकगुरुः प्रहृष्टः॥

विनिर्मितो यः परमाणुसारैः समुध्दृतैः शास्त्रपयोधिमध्यात्।
न किं स सम्राट् जगतो विभूत्यै कल्पेत कार्यं सदृशं हि हेतोः॥

## श्रीभद्राद्रिराममुप्रभातम् (अनुवृत्तम्)

(श्रीभाष्यं - विजयसारथि:)

देवाधिदेव चिरकालवियोगतप्तामेतां नितान्तरुदितां जगतीं स्वराधाम्।
पाहि प्रभो मुरलिमोहन कृष्णमूर्ते भद्राद्रिराम –

स्वामिन् सखे हृदयकालिय एष वैरहालाहलं परिवमन् विधुनोति
आरुह्य तन्मदमपाकुरु बालकृष्ण भद्राद्रिराम – सर्वम्।

पाप मनः सुमनसां परिपीडनेन नित्यं प्रहृष्यति विवेकपथं विहाय।
कृष्ट्वा हलेन बलराम पुनीहि तत् त्वं भद्राद्रिराम –

कामादिकौरवनिपीडितमात्ममित्रं ज्ञानादिपाण्डवचयं विमलस्वभावम्।
कर्तव्यकर्मणि निवेशय कृष्णमूर्ते भद्राद्रिराम –

शेते सुखं श्रुतिहितार्यविघातभारं निक्षिप्य दुर्मतिषु हन्त कलि-
दुरात्मा।
निर्मूल्य तद्बलमिलामव कल्किमूर्ते भद्राद्रिराम –

राकासुधाकरमहोदरसुन्दरास्य राजीवलोचन नमज्जनपारिजात।
आनन्दसागर समस्तजगन्निवास भद्राद्रिराम –

सृष्टिस्थितिप्रलयकर्मसु शक्तियुक्त ब्रह्माब्जनाभनिटलांबकभूमिका-
स्त्वम्।
धृत्वा स्वयं विहरसे स्वकमाययैव भद्राद्रिराम –

मायाशरावपिहितो निजचित्प्रदीपो नो भाति, भासयति नैव पदार्थ-
जातम्।
भग्नावृति प्रकटयाशु निजं स्वरूपं भद्राद्रिराम –

---

ज्ञानप्रभावाज्जडता विहन्यते
ज्योतिर्बलादत्र तमो विहन्यते।
ऋतप्रभावादनृतं विहन्यते
मणिप्रभावादनलो विहन्यते
भवो मदीयो हत एवमञ्जसा
महानुभावैर्भगवन् समागमात्॥

सिद्धप्पाराध्यः।

**एकातपत्रं जगतः प्रभुत्वं नवं वयः कान्तमिदं वपुश्च ।**
**अल्पस्य हेतोर्बहु हातुमिच्छन् विचारमूढः प्रतिभासि मे त्वम् ॥४७**

एकातपत्रं एकमेव आतपत्रं छत्रं यस्मिन् तत्, जगतः अस्य भूलोकस्य, प्रभुत्वं आधिपत्यं, अन्यः प्रभुरासीच्चेत् तदीयस्य छत्रान्तरस्य सत्त्वेन जगतः प्रभुत्वं अनेकातपत्रं स्यात्। तदभावात्तु दिलीपे प्रभौ सति जगत्प्रभुत्वं एकातपत्रमभवत्। नवं नूतनं विषयोपभोगार्हं वयः प्रायः, कान्तं कमनीयं सर्वलक्षणलक्षितं अतिसुन्दरं, इदं त्वया मया च प्रत्यक्षीक्रियमाणं, वपुश्च शरीरं च (इत्येतत्) बहु अत्यन्तमधिकं (वस्तु), अल्पस्य दभ्रस्य एकगोरूपस्य (वस्तुनः) हेतोः, एतद्रूपेण कारणेनेत्यर्थः। हातुं त्यक्तुं, इच्छन् अभिलषन्, त्वं, मे मम, विचारमूढः विचारे कर्तव्याकर्तव्यविवेचनविषये मूढः मोहवान्, ज्ञानशून्यः, प्रतिभासि दृश्यसे। आपाततः बुद्धिमानिव लक्ष्यसे। विचारे परामर्शे सति तु मूढो ज्ञायस इत्यपि सुवचम् ॥

**भूतानुकम्पा तव चेदियं गौरेका भवेत् स्वस्तिमती त्वदन्ते ।**
**जीवन् पुनः शश्वदुपप्लवेभ्यः प्रजाः प्रजानाथ पितेव पासि ॥ ४८**

"अल्पं बहु इति विमर्शो मम कदाचिदपि न प्रवृत्तिः। आपन्नरक्षणं मया कर्तव्यम्। दया मामेवं निर्बध्नाति", इति चेत् अत्रोत्तरमाह। इयं स्वशरीरत्यागेनापि नन्दिनी रक्षणीयेति प्रतिपत्तिहेतुः, तव भवतः त्वदीयेति यावत्, भूतानुकम्पा चेत् सर्वप्राणिविषया दया यदि, दयया प्रेरितः एवमध्यवसायं कृतवानस्मीति यदि वदसीति भावः। (तर्हि तद्विषये वदामि, शृणु।) त्वदन्ते तव

नाशे, मरणे, एका गौः नन्दिनी, स्वस्तिमती क्षेमवती, निवृत्तमरणापाया, भवेत् जायेत। हे प्रजानाथ नरपाल, जीवन् पुनः नन्दिनीं मदाहाराय मुक्त्वा अप्रसक्तमरणस्तु, (त्वं), प्रजाः पौरजानपदान् सर्वान् जनान्, पितेव जनक इव, पासि रक्षसि। रक्षिष्यसीति भावः। दयाप्रसरः किं एकस्यां गवि भवितुमर्हति उत देशबासिनीषु भूयिष्ठासु प्रजासु, इति सम्यक् चिन्तय। दयाविषयेऽपि वा अल्पबहुविचारोऽवर्जनीय इत्यभिप्रायः।

तव भूतानुकम्पा चेत् इयमेका गौः स्वस्तिमती भवेदित्यन्वयं व्याख्यातार आहुः॥

**अथैकधेनोरपराधचण्डाद् गुरोः कृशानुप्रतिमाद् बिभेषि।**
**शक्योऽस्य मन्युर्भवता विनेतुं गाः कोटिशः स्पर्शयता घटोध्नीः॥४९**

स्वशरीरत्यागेनापि धेनुरक्षणश्रद्धा न अविवेकात्। नापि उत्कटया भूतानुकम्पया। अपि तु गुरुभयात्, इति चेत्, तत्राह। अथेति पक्षान्तरे। इतः परमित्यर्थः। पूर्वोक्ते कारणे विनेति यावत्। एकधेनोः एकैव धेनुः दोग्ध्री गौः यस्य तस्मात्, अपराधचण्डात् अपराधे कृत्याकरणरूपे वा अकृत्यकरणरूपे वा दोषे प्रसक्ते सति चण्डात् अत्यन्तकोपशीलात्, कृशानुप्रतिमात् अग्नितुल्यात्, कोपे जाते सद्यः भस्मसात् कर्तुं क्षमादिति भावः। गुरोः वसिष्ठमहर्षेः, बिभेषि भीतोऽसि। इति प्रश्नकाकुः। गुरुभयरूपात् कारणात् किं ते इयं श्रद्धा? (एवं चेत् तत्र वक्तव्यं ब्रवीमि शृणु)। घटोध्नीः घटा इव तद्वत् बृहन्ति ऊधांसि आपीनानि यासां ताः, गाः धेनूः, कोटिशः बहुकोटिलङ्ख्यया, स्पर्शयता ददता, दत्वेति भावः। अस्य गुरोः, मन्युः क्रोधः, विनेतुं अपनेतुं, शमयितुं, शक्यः अर्हः।

अधेनोरपि गोर्नाशः स्ववित्तनाशरूपत्वात् कोपस्य हेतुः। धेनोर्नाशः सुतराम्। एकस्या एव सत्याः धेनोः नाशः सुतमाम्। क्रोधस्य औग्र्यं दुस्सहत्वं च उपमानव्यङ्ग्यम्।

साधारणः कश्चित् गोपालश्चेत् तेन गुरोः क्रोधः अपनेतु-मशक्यः। भवान् पुनः अखण्डभूमण्डलाधिपतिः। अस्याः मया भक्षितायाः एकस्याः गोःस्थाने एका कोटिर्धेनूनां दीयताम्। एकया कोट्या अतृप्तश्चेत् अपरा कोटिर्दीयताम्। तथा-प्यतृप्तश्चेत् तृतीया कोटिर्दीयताम्। यावतीभिः सः तृप्तो भवेत् तावत्यो दीयन्ताम्। न हि त्वमसम्पन्नः। अतो गुरुभयादपि त्वया आत्मनाशो न कर्तव्य इति॥

**तद्रक्ष कल्याणपरम्पराणां भोक्तारमूर्जस्वलमात्मदेहम्।**
**महीतलस्पर्शनमात्रभिन्नमृद्धं हि राज्यं पदमैन्द्रमाहुः॥ ५०**

एवं स्वपक्षमुपपाद्य सप्रलोभनमुपसंहरति। तत् तस्मात्, कल्याणपरम्पराणाँ शुभसन्ततीनां, सानुबन्धं उत्तरोत्तरं भविष्यतां बहूनां शोभनानामिति यावत्, भोक्तारं अनुभवितारं, ऊर्जस्वलं बलवन्तं दृढं च, आत्मदेहं स्वशरीरं, रक्ष धारय, मा मह्यं अर्प-यित्वा विनाशय। कल्याणपरम्पराणाँ भोक्ता अयं देह इति कथ-मवगम्यत इति चेदाह। ऋद्धं जलसमृद्धिः सस्यसमृद्धिः धन-समृद्धिः गुणसमृद्धिः इत्याभिः समृद्धिभिः युक्तं, राज्यं राज-पदं,देशशासनाधिकारं, महीतलस्य भूप्रदेशस्य स्पर्शनमात्रेण सम्बन्ध-मात्रेण, भिन्नं भेदवत्, ऐन्द्रं इन्द्रसम्बन्धि, पदं हि स्थानमेव अधि-कारमेव, आहुः वदन्ति अभिज्ञाः। ऐन्द्रं पदं दिवि अस्ति। ऋद्धं राज्यं तु भूतले अस्तीत्येतावानेव भेदः। अन्यथा तु सर्वथा अभेद एव। तथा च ऐन्द्रे पदे स्थितस्य यावन्तो भोगाः तावन्तः ऋद्धे राज्ये स्थितस्य तत्रापि भविष्यन्ति। तेषां भोक्तुरस्य देहस्य हानं न युज्यते।

ननु भोक्ता देही, न तु देहः। भ्रान्तो वाऽत्र कविः। चार्वाकमतप्रविष्टो वा। उभयमपि नास्ति। भोगायतनं शरीरम्। शरीरं विना आत्मनो भोगा नैव भवेयुः। अतोऽस्य प्राधान्यस्य व्यञ्जनाय भोगायतने भोक्तृत्वोपचारः॥

**एतावदुक्त्वा बिरते मृगेन्द्रे प्रतिस्वनेनास्य गुहागतेन।**
**शिलोच्चयोऽपि क्षितिपालमुच्चैः प्रीत्या तमेवार्थमभाषतेव॥ ५१**

मृगेन्द्रे सिंहे, एतावत् "एकातपत्रं जगतः प्रभुत्वं" इत्यारभ्य "तद्रक्ष कल्याणपरम्पराणां" इत्येतदन्तं, उक्त्वा उदीर्य, विरते उपरते, भाषणात् निवृत्ते सति, गुहागतेन गुहायाँ उत्थितेन अस्य सिंहस्य, प्रतिस्वनेन प्रतिध्वनिना, शिलोच्चयोऽपि पर्वतो हिमवानपि प्रीत्या दिलीपविषयें प्रेम्णा, क्षितिपालं राजानं दिलीपं, तमेव सिंहोक्तं 'तद्रक्ष' इत्येतमेव, अर्थं विषयं, अभाषतेव अब्रवीदिवेत्युत्प्रेक्षा।

सिंहस्य सर्वं भाषितं गुहायां प्रतिध्वनितमेव। तथापि उत्तरोत्तरभाषणे श्रूयमाणे पूर्वपूर्वभाषणप्रतिध्वनिः न तथा स्पष्टं दिलीपस्य कर्णे पपात। तस्मिन् भाषणाद् विरते तु चरमवाक्यस्य "तद्रक्ष कल्याणपरम्पराणां" इत्यादेः प्रतिध्वनिः स्फुटमस्य श्रवणगोचरोऽभवत्। तत्र कविरुत्प्रेक्षते शिलोच्चयोऽपि तमेवार्थमभाषतेवेति। शिलोच्चयभाषणे हेतुः प्रीत्येति। सिंहः केनापि हेतुना गोभक्षणतर्षादिनाऽभाषत। शिलोच्चयस्तु प्रीत्या।

सूक्ष्मधर्मानभिज्ञानां एवमापातरमणीयार्थभाषण एव प्रवृत्तिर्जायेतेति उत्प्रेक्षयेह ध्वन्यते॥

**निशम्य देवानुचरस्य वाचं मनुष्यदेवः पुनरप्युवाच।**
**धेन्वा तदध्यासितकातराक्ष्या निरीक्ष्यमाणः सुतरां दयालुः॥ ५२**

देवानुचरस्य ईश्वरकिङ्करस्य सिंहरूपस्य, वाचं भाषितं, निशम्य आकर्ण्य, मनुष्यदेवः नृपतिः दिलीपः, तेन सिंहेन अध्यासिता आक्रान्ता अत एव कातराक्षी कातरे त्रस्ते भयाभिव्यञ्जके अक्षिणी लोचने यस्याः सा, एवम्भूतया, धेन्वा नन्दिन्या, निरीक्ष्यमाणः 'त्रायस्व मां' इति दीनं प्रार्थनाँ कुर्वंत्येव ईक्ष्यमाणः, अत एव सुतरां पूर्वापेक्षया अभ्यधिकं, दयालुः अनुकम्पावान् सन्, पुनरपि, उवाच अभाषत।

देवानुचरस्य वागिति ताँ सादरं सावधानं सम्यक् शुश्राव। अथापि स्वस्य यः मनुष्यदेवभावः तदविरुद्धां ताँ न मेने। विरुद्धामेव तु मेने। अतः पुनरपि स्वपक्षस्यैव न्याय्यत्वं उपपादयन् उवाच। "निरीक्ष्यमाणः सुतरां दयालुः" इत्यनेन आत्मत्यागेनापि आपन्नरक्षणं कार्यमित्येव स्वपक्ष इति व्यज्यते॥

RS ...0878

R.S. VIDYAPEETHA LIBRARY TIRUPATI 039878

...यप्रदानसारः।

...टमोऽधिकारः

एवमुक्तवति भगवति, "भोगार्थिनो युष्मान् अस्मद्गोष्ठ्यां न प्रवेशयिष्यामः" इति स्थितो महाराजः (सुग्रीवः) प्रसन्नः स्वापराधस्य भगवति क्षमाँ प्रार्थ्य स्वयमेव पुरुषकारो भूत्वा "आगत्य मृदं गन्धं च गृह्णीत" "विशत अस्मन्निवासं" इत्यादि-प्रक्रियया "वयं विभीषणश्च निर्विशेषं दासवृत्तिं लभेमहि। वयं चास्य "सखा दासोऽस्मि" इत्येवं दासा भवेम" इति विज्ञापयामास।

इत्थं प्रतिबन्धके निवृत्ते, अनन्तरं भगवतः शरणागतलाभात्मकपुरुषार्थसमाप्तिप्रकारं, 'दत्तमस्याभयं मया' इत्युक्त्या अभयं

प्राप्तवतः शरणागतस्य, इत्थं विशिष्य भगवद्वचनं विना स्वार्थं अन्यं कञ्चन उपायं विना च, शरणागतस्याभिमानेऽन्तर्भूय सह आगतानां चतुर्णां राक्षसानां च भगवच्चरणारविन्दलाभात्मक-परमपुरुषार्थसम्पत्तिप्रकारं, पर्यङ्कविद्यादिष्विव परस्परसंश्लेष-जनितप्रीतिपरीवाहात्मकान् संवादविशेषाँश्च सर्वान् अस्य सर्गस्य शेषेण उपरितनसर्गोपक्रमेण च उक्त्वा शरणागतिवेदरूपस्य प्रबन्धस्य उपनिषद्भागरूपं अभयप्रदानप्रकरणं समापयति श्री-वाल्मीकिभगवान्।

तत्र स्वेन प्रथमं कृतस्य सङ्कल्पस्य अन्यथाकरणक्षमो यथा कश्चिन्नास्ति तथा निरङ्कुशस्वातन्त्र्यशाली भगवान् आश्रितपर-तन्त्रः सन् महाराजं सुग्रीवं) वीराँश्च प्रसन्नमतीन् कृत्वा "आ-नयैनं हरिश्रेष्ठ" इति येनोवाच, तेन भगवतो बन्धुभावेन सौ-शील्येन च आकृष्टः महाराजः यद्द विज्ञापयामास तदाह –

**रामस्य तु वच श्रुत्वा सुग्रीवः प्लवगेश्वरः।**
**प्रत्यभाषत काकुत्स्थं सौहार्देनाभिचोदितः ।**

शरणागतं, स्वेन परित्यागे अन्यत्र यत्र क्वापि गमने वा विनाश एवेत्यस्याँ अवस्थायाँ स्थितं भक्तं विभीषणं, एतद्वधसङ्कल्पं कृत-वतः स्वजनांश्च रमयामासेत्यतः इह रामस्येति निर्देशः।

'तु' इत्यनेन महाराजस्य मनःकालुष्यक्रोधभरितपूर्वावस्था-पेक्षया मतिप्रसादप्रीतिभरितं अवस्थाभेदं स्थितं ब्रवीति।

सुग्रीवः प्लवगेश्वरः। शरणागतं प्रति अपचाररुचौ निवृत्तायां हि अस्य नाम गौरवं च प्रतितिष्ठति स्म।

काकुत्स्थम्। परावस्थायां दुर्लभस्य सौशील्यस्य अद्य प्राप्तस्य स्थितिरियम्।

सौहार्देनाभिचोदितः। इत्थं निरुत्तरो महाराजः भगवतो वा स्वस्य वा सौहार्देन प्रेरितः भाषते।

**किमत्र चित्रं धर्मज्ञ लोकनाथ सुखावह।**
**यत् त्वमार्यं प्रभाषेथाः सत्त्ववान् सत्पथे स्थितः॥**

किमत्र चित्रं। अस्मादृशाः यदि एवं भाषेरन्, तत् किल आश्चर्यं भवेत्। भवति भाषमाणे किमाश्चर्यमस्ति। स्वभावोऽयमिति स्थातव्यमित्येतावदेव किल।

धर्मज्ञ। शाखातः शाखाँ प्लुत्वा अटतां अस्माकं भवदभिमताः सर्वे धर्माः किं ज्ञातुं शक्याः? 'सूक्ष्मः परमदुर्ज्ञेयः सतां धर्मः प्लवङ्गम' इति भाषितवतो भवत एव धर्मयाथार्थ्यं ज्ञेयम्।

लोकनाथ। स्वस्वस्य नाशाद् रक्षणं स्वामिनो नोत्कर्षाय। शरणागतं अभयं दत्वा अरक्षीः। अस्मांश्च अपचारात् निवार्य अरक्षीः।

सुखावह। भक्तस्य विभीषणस्य भवत्कैङ्कर्यकरणलाभात् अस्माकं तत्कैङ्कर्यलाभाच्च उभयवर्गमपि कृतार्थमकार्षीः।

सत्त्ववान्। अदृष्टपूर्वशरणागतविषये ऐककण्ठ्येन स्वजनैरुक्तानां उपपत्तीनाँ निर्बन्धानाँ च अप्रधृष्ये व्यवसाये हन्त कियद् दार्ढ्यम्?

सत्पथे स्थितः। बृहस्पति शिबि रघु वानर कपोत वसिष्ठ विश्वामित्रादिभिः सद्भिः आचरिते शरणागतपरित्राणरूपे मार्गे भवतो निष्ठा एककोटिशरणागतैरपि अप्रकम्प्या स्थिता।

यत् त्वमार्यं प्रभाषेथाः। भवदुदीरिता गाथा तथाविधा आसीत् यथा तस्याः छायामाश्रित्य व्याघ्रहरिणौ एकस्मिन् तीर्थे जलं पिबेताम्॥

अस्मत्प्रतिषेधे अशक्तः सन् किमेवं श्लाघसे? मानसापचारो यथा उपरमेत् तथा अपि नाम धीः प्रसन्ना? इति चेदाह —

**मम चाप्यन्तरात्माऽयं शुद्धं वेत्ति विभीषणम्।**
**अनुमानाच्च भावाच्च सर्वतः सुपरीक्षितः ॥**

केनापि प्रसादयितुमशक्यतया कलुषीभूतं मे मनः भवत्सूक्तिभिः प्रसन्नमभूत्। शरणागतः विभीषणः शुद्ध इति प्रतिबोधं प्राप्तवानस्मि।

अनुमानाच्च। 'प्रणादश्च महानेषः'' इत्युक्तरीत्या स्वरप्रसादादिभिः।

भावाच्च। अभिप्रायव्यञ्जकैः अन्यैराकारैश्चेति भावः। "सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः'' इत्युक्तरीत्या अस्मदन्तःकरणसम्मत्या चेति वा।

सर्वतः। अन्तर्बहिश्च एकरूपं यथा तथा, अथवा नायं रावणः, नापि रावणप्रेषितः, नापि रावणानुरक्त इति सर्वैः प्रकारैः निस्सन्देहं अवगतवन्तः स्म इति।

सुपरीक्षितः। इतः परं अस्मान् आकुलमतीन् कर्तुं भवताऽपि न शक्यमिति तात्पर्यम्

## रामराज्यम्।

(वि.वि. श्री)

वाल्मीकिः— महन् श्रीराम, यत् त्वं वदसि तत्र सम्प्रतिपत्तिं कर्तुमिच्छामि। किमपि वदति मां त्वच्चरितविषयोऽयं इतिहासः स्वयमेकं विद्यास्थानं अथवा कला भविष्यति। इदं मे महद् भागधेयं यत् परिस्थितयः समुदिताः अस्य महतः

प्रबन्धस्य करणे मम अनुकूला अभवन्। महानयं प्रबन्ध इतीदं अभ्युपगच्छामि। परन्तु अत्र हेतुः एषा परिस्थितिः या निरुपमं भवन्तं अस्य निरुपमस्य काव्यस्य नायकत्वाय उपस्थापयति स्म।

रामः— न भगवन्। न मे सम्प्रतिपत्तिः। कालः जलप्रवाह इव अतीतं विस्मारयति। अयं रामः तज्जीवितकालानन्तरं कति चन वत्सरान् स्मृतो भवेत्, विशिष्य तदपत्यैः, तन्मित्रैः प्रजाभिश्च। भगवान् पुनः शाश्वतेन अनेन भवद्ग्रन्थेन मां अमरं अकार्षीत्। अमरीकरणं सर्वासां कलानां साधारणम्। तथापि तत् अत्यन्तं पारमार्थिकं काव्यकलायाः, या कलासु दिव्या कला। अत्र भवान् महाकविः, महत्तमः भविष्यतां सर्वेषाम्। कवयः स्रष्टुरपि महीयांसः स्रष्टारः। अत्र भवान् स्रष्टा रामस्य, रामचरितस्य, अपि च तस्य, यद् रामराज्यमित्यभिधीयते।

वसिष्ठः— न रामचन्द्र। विनयात् त्वमेवं भाषस इति साधु एतत्। किन्तु तत्र भवान् वाल्मीकिरपि रामायणं निबन्धुं नाशक्ष्यत् यदि रामो नाभविष्यत्।

हनूमान्— यदि सीता वा, भगवन्, या आगच्छति।

[परिषदि सम्भ्रमो भवति रामावस्थानप्रदेशं प्रति सावधानं गच्छन्त्याः सीताया दर्शने।]

वाल्मीकिः— तथ्यमवादीः, भो हनूमन्। ममैव सामि मतिरासीत् काव्यमिदं सीतानाम्ना व्यपदेष्टव्यमिति। परं तु पश्चात् रामात् अभिन्ना सीता, न तु भिन्नेति निरचिनवम्।

[इयता कालेन राममुपगता सीता। कुशलवौ तां प्रणमतः। रामः अर्धमाश्लिष्यन्निव तां गृहीत्वा सिंहासने तदासनं नयति।

कुशलवौ सिंहासनस्य पार्श्वयोः स्थातुमादिष्टौ। उपसिंहासनं निवेशिते विशेषासने आसितव्यमिति रामः वाल्मीकये सज्ञां करोति। सर्वा परिषद् पुनरुपविष्टा। कतिपयक्षणविरामानन्तरम्—]

रामः— (सिंहासनात्) अस्मन्महागुरो, भगवन् वाल्मीके, महर्षयः, प्रियभ्रातरः, सचिवाः, पौराः, सर्वेभ्यः सप्रश्रया मे प्रणामाः। इदमिदानीं चिन्तितवानस्मि। महतो नाटकस्य महदवसानं भवितुमर्हति। वस्तुतः अस्मै वासराय प्रतीक्षाँ कुर्वन् अवर्तिषि। चिरात् पूर्वमेव सिंहासनं परित्यज्य सीतया साकं वनं पर्वतं वा आश्रितोऽभविष्यम्। किन्तु मम भ्रातरः, येषां न तथा तत्त्वविवेकः यथा मयि भक्तिः, मया त्यक्तं सिंहासनं अध्यासितुं नेच्छन्ति। चिरन्तनमिदं राज्यम्। तद् अराजकं कृत्वा न गन्तव्यं मयेत्यभात्। पदं वा अधिकारो न मे आकर्षाय अलम्, न मे तत्र सङ्ग इति भवन्तः सर्वे जानन्तीति मे प्रत्ययः। वस्तुतः मम महत्सु मनोरथेषु अयमेकः यत् विषयभोगविरक्ता कुटुम्बबन्धान्मुक्ताश्च ये चतुर्थाश्रमिणः त एव लोके राजानः चक्रवर्तिनश्च कर्तव्या इति। तथा सत्येव प्रजारूपस्य संसृष्टमहाकुटुम्बस्य अधिपतयः निर्वाहकारिणश्च सम्यञ्चो भवेयुः। अथ तु केवलेन मनोरथेन किं भवति। दूरे भविष्यत्काले कदाचिदेवं भवेदिति अस्ति भानम्।

अद्य तु वक्तव्यमिदम्। सीतयाऽनुमतः (सीतां पश्यति सा शिरःकम्पेन अनुमतिमावेदयति) अध्यवसितवानस्मि पुरातनं सिंहासनमिदं परित्यक्तुं, तत्र आसनद्वये इमौ यमलौ कुशलवौ उपवेशयितुं च। सन्तोषदायिनी इयं परिस्थितिः यत् इमौ उभौ न युवराजभावेन, महता विभवेन, परिवर्धितौ अपि तु दरिद्रधार्मिकवृत्तौ शिक्षां दत्वा वर्धितौ। अतोऽहं मन्ये यदि भगवता

वाल्मीकिना तदीये महति काव्ये चित्रितस्य रामराज्यस्य अनुवृत्तिसम्भवः कश्चिदस्ति तर्हि तदुचिताः परिस्थितयः सम्प्रति अत्र सम्पादिताः सन्ति ।

[एवं वदन् श्रीरामः कुशलवौ सिंहासने उपवेशयति । गृह्णाति च सीतां करेण । अवरोहणात् प्राक् भूयो भाषते च]

श्रीरामः— इत्थं वयं राजासनं परित्यक्तवन्तः स्मः । अस्मत्प्रियसुहृदः, अस्मद्भ्रातरः, वयं गच्छामः । नूनं न वयं जानीमः क्वेति । अस्य चिरन्तनस्य साम्राज्यस्य अधिकारं अस्मत्कुमाराभ्यां अर्पितवन्तः स्मः । यदि यूयं सर्वे आवयोरुभयोः अनुरागवन्तः अनुबन्धवन्तश्च तद् युष्माभिः आवयोर्गतयोः न चिन्तितैः, न वाग्भिः, न गाथाभिः प्रदर्शनीयं, अपि तु धर्मे, प्राचीनमिदं सिंहासनं यथार्हं अध्यासीनयोः अनयोश्च प्रावण्येन । पारमार्थिकं परिपूर्णं च रामराज्यं तावत् न भवेत् यावत् रामो राज्ये वर्तते । यदा सर्वैरस्माभिः मिलितैः निर्मितस्य संसृष्टकुटुम्बरूपस्य राष्ट्रस्य सम्बन्धिनो नियमाः साराँशश्च आवयोरपगमानन्तरमपि बलवत् निपुणं च आदृता भवेयुः तदैव रामराज्यं निष्पन्नं भवेत्, विकसितं च । भगवान् कटाक्षयतु युष्मान् सर्वान्, राष्ट्रं, राजानौ च ।

[एवं वदन् रामः सीता च शालातः बहिर्गच्छतः । पार्षदाः केचित् तयोर्मार्गं निरोद्धुं प्रयतन्ते । विरमन्ति च तयोर्मुखे अभिव्यक्तं दृढमध्यवसायं प्रसमीक्षमाणाः । तौ अनुसरन्तः भरतलक्ष्मणशत्रुघ्ना अपि बहिर्गच्छन्ति । पार्षदेषु महान् क्षोभो दृश्यते । अथ कतिपयैर्निमेषैः सिंहासनं समया अभिद्रुत्य सुमन्त्रः कुशलवयोः विज्ञापयति ।]

सुमन्त्रः— दृष्टं परमाश्चर्यम् । द्वारे अद्भुतः दिव्यो रथः तिष्ठन्

प्रतीक्षमाणः अभूत्। सीतारामयोः तदारोहणानन्तरक्षणे स उड्डीय अगात्, कथं कुत्र, न शक्नुमो वक्तुम्। हा विधे, अयं नु अन्तो रामराज्यस्य ?

भगवान् वसिष्ठः— न सुमन्त्र। न तत् तथा। रामचन्द्रो यद-भासिष्ट तत् सर्वं साधु। वास्तवं रामराज्यं अद्यैव उपक्रमते।

(कृत्स्ना परिषत् तत उत्तिष्ठति, गायति च)

रघुपति राघव राजा राम्!
पतित पावन सीता राम्!

इति रामराज्यं नाटकं सम्पूर्णम्।

## प्रकृतिभेदः ।

राजुः— किमरे, भुञ्जानौ आगन्तुकौ इयन्तं कालं निर्निमेषं अव-हितः पश्यन् अवतिष्ठाः ? तथा द्रष्टव्यं तत्र किमभूत् ?

शीनिः— अरे भोजनमपि एका कलेति मे मतिः। केचित् रम-णीयं भुञ्जते। तद्दर्शने मे महत् कुतूहलम्। अन्ये भोक्तुं न जानन्ति। दुर्भुञ्जते। तेषु अनुकम्पा भवति।

राजुः— तथा नु। अस्त्विदं ते भोजनकलानुभवरासिक्यम्। अन-योर्भोजने किं नाम कञ्चन विशेषं अद्राक्षीः ?

शीनिः— आं, अद्राक्षम्' उभावपि साधु भुञ्जाते। अस्ति तु तत्र कश्चन विशेषः। त्रिरन्नं परिविष्टम्। त्रीणि उपसेचनानि सूपकर्दमः, रसः, तक्रमिति। तत्र अन्नस्य मध्ये गर्तं कृत्वा प्रतीक्ष्य स्थित एकः गर्तपूरके कर्दमे दत्ते महत् कर्म किमपि

कुर्वन्निव अन्नं पेष्टुमारभत। अवधानं सर्वं पेषणे। कृत्स्नं करतलं तत्र व्याप्रियत। गात्रेऽपि चलनमभूत्। एकैकस्मिन्नपि पुलाके कर्दमरूषणरहितः अल्पोऽपि भागो यथा न स्यात् तथा पिष्टमिति निश्चयः तृप्तिश्च यावत् अजनिषातां तावत् अपिषत्। ततः परं जलसिकतासुसम्मिश्रितशिलासुधां (सिमेण्ट्) लेपकार इव करणेन, तदन्नं हस्तेन आदाय आस्ये पूरंपूरं अभुङ्क्त।

अपरस्तु यथा परिविष्टः तथैव स्थितस्य अन्नघनस्योपरि अर्धदर्वीकर्दमे दत्ते अलमित्युक्त्वा अङ्गुल्यग्रैः कर्दमसम्पृक्ताः सम्पृक्तं अन्नं किञ्चित् किञ्चित् आदाय आस्ये क्षिप्त्वा अभुङ्क्त।

उभयं मे प्रेक्षणीयमभूत्।

## सहधर्मचारिणी उत समधर्मचारिणी ?

R. Ramamurthy, M.A.

चारुमती चारुचामीकरनिभाङ्गी। शिरीषकुसुमाधिकसुकुमारेषु तस्याः अङ्गेषु सन्नद्धं यौवनं पश्यतां नयनानि अपचकर्ष, मनांसि च अपजहार। धातुः विभुत्वं तस्याः वपुश्च अनुचिन्त्य सा अपरा स्त्रीरत्नसृष्टिरिति विना वैमत्यं सर्वे प्रशशंसुः। गैर्वाण्यां, आङ्गल्यां, गानकलायां, पचनपद्धत्यां च असमानेन, प्रकृतिसिद्धेन प्राक्तनपुण्यभवेनेव पाण्डित्येन भ्राजमाना सा समानवयसां युवतीनां स्पर्धासूयानन्दलज्जाविस्मयानां मनोमहोदधिकल्लोलानां कारयित्री बभूव। सुप्रसिद्धे सुप्रतिष्ठिते महति व्यापारालये, कस्यचन विभागस्य प्रथमाधिकारिणी सा अमृताब्धिपुत्र्याः अव्याजस्य अमोघस्य अपाङ्गवीक्षणस्य अभिमता विहारस्थलीव शुशुभे। "अगण्यानां

पुण्यानां अखण्डं अनघं फलमिव भासमानं अस्याः रूपं अनुभोक्तुं कं वा विधिः समुपस्थास्यति'' इति यूनां बृन्दे ताम्यति, ''लभेत वा प्रार्थयिता न वा श्रियं, श्रिया दुरापः कथमीप्सितो भवेत्'' इति न्यायेन अंबुजाक्षः तस्य व्यापारालयस्य उपसचिवः तस्याः स्वयंवृतः पतिरभूत्। ''सौभाग्यदेवतायाः द्वाराणि को वा पिधातुं प्रभवति'' इति मोदमानः सः अभूतपूर्वेण अमन्देन सर्वाङ्गप्रसृतेन आनन्देन आप्लावितः आत्मानं बहुमेने।

''रे, रे, कस्य वा अत्यन्तं सुखं दुःखं वा एकान्ततः उपनतम्?। दशा चक्रनेमिक्रमेण उपरि नीचैश्च गच्छति। अधुना अंबुजाक्षः गरुड इव डयते। सः नूनं शीघ्रं वामविधिना विशिखेन विद्धः पतिष्यति। दांपत्यस्य सुखस्य रूपं धनं वा मूलं भवति?। यथा सुगुणैः हृदयं बध्यते, तथा दुर्गुणैश्च बाध्यते। एषा चारुमती, सूर्यस्य सुवर्चलेव, किं अम्बुजाक्षस्य सहधर्मचारिणी गृहिणी भविष्यति?। भर्तृसमानस्य धर्मस्य स्थानस्य च लिप्सया सा व्याघ्रीव किल हुँकरिष्यति। भीतः, त्रस्तः, अवमतः अंबुजाक्षः राहुग्रस्तचन्द्रमा इव नष्टशोभः, क्रमेण क्षीणानुरागः, भार्यायाः अविनयाचलोपत्यकासु विशीर्णव्रणितशरीरः विलपिष्यति'' इति अंबुजाक्षस्य सुहृदः दुष्टहृदयाः, बदरिका इव बहिरेव मनोहराः, अशान्तं असूयानलं पारस्परिकप्रजल्पवारिणा प्रशमयितुं अयतन्त।

''चारुमति, चारुदति, चारुभाषिणि, चारुहासिनि'' इति प्रतिक्षणं प्रेमगानलोलस्य, ''कान्तासंमिश्रदेहोऽहम्'' इति कामकादंबरीपरवशस्य, अंबुजाक्षस्य सा हृदयपञ्जरशारिकेव, प्राणनाडिकेव, कामेश्वरीव अशोभत। अभिनवं यौवनम्, असमानं सौन्दर्यम्, अमितं धनम्, सर्वातिशायि सौकर्यपौष्कल्यम्, अखण्डितं स्वातन्त्र्यम् – एतानि हि दांपत्यवल्लर्याः अचिराङ्कुरितमूलायाः

चारिणि। अतः इमौ दंपती वागर्थाविव संपृक्तौ, स्मृतिवेदाविव अभिन्नाशयौ, परस्परप्राप्तिपरिपूर्णकामौ, दीर्घदीर्घायै दाँपत्ययात्रायै सन्नद्धसमुचितपाथेयाविव व्यलसताम्।

एवं एकः संवत्सरः संक्षिप्तः क्षण इव अविदितः अयात्। एकदा कन्यामासान्तिमदिवसस्य शुक्रवासरस्य सायङ्काले यदा कार्यालयस्य महती होरासूचिका पञ्चमस्वरेण पञ्चवारं दध्वान, तदा मुख्यं कर्म आशु करणीयं विस्मृतं स्मरन्ती चारुमती आसनात् उदतिष्ठत्। जानुदघ्नं प्रणतपूर्वकायस्य बद्धाञ्जलिपुटस्य सेवकस्य विनयं शिरःकंपेन नातिपरिस्फुटेन अभिनन्दन्ती, सञ्चारिणी लतेव आपणवीथीं जगाम। प्रत्यापणं अटन्ती निर्णीतपूर्वाणि वस्त्रवासनद्रव्याणि दैनन्दिनोपयोगार्हाणि क्रीत्वा गृहेभ्यः प्रतस्थे। उत्साहवाहिनीवारिषु निमग्नमपि तस्याः मनः, मानसे सरसि निमज्य उच्चैः उपर्युपरि पोप्लूयमानं हंसरत्नमिव अभासत। आयान्तं सेवादक्षं सेवकं अनादृत्य, भारवतीं पत्रपेटिकाँ श्यामाविटपसदृशाभ्याँ हस्ताभ्याँ वहन्ती यदा गृहान्तं प्राविशत्, तदा आयासेन आकुलितं आसीनं अंबुजाक्षं आत्मवल्लभं अपश्यत्। किञ्चिदिव संभ्रान्ता, "कार्यालयसचिवात् अनुमतिं अवाप्य किं आगतवन्तः ?। अतिशीघ्रस्य भवतां गृहागमनस्य कारणं किमिति ब्रुवन्तु। च्युतधैर्यं मनः यदनिष्टं तदेव आशङ्कते" इति वाणीवीणेव चक्वाण।

"शिरोवेदना बलवती मां अबाधत" इति यदा सः प्रत्युवाच, तदा मधुनोपि मधुरतरेण स्वरेण "शिरोवेदना नु ?। सा कथं जाता ?। ताँ अधुनैव सह्यवेदनां करोमि।" इति वदन्ती सा तस्य ललाटं विशाल कमलकोमलेन हस्ताग्रेण पस्पर्श। "उष्णं नैवास्ति। आशु कापीपानं आनयामि। बाधा बद्धा भविष्यति। अधुनातने काले एषा बाधा अनिवद्य अस्मान् ग्रसते, अनापृच्छ्य च त्यजति" इति कूजन्ती महानसं प्रविवेश।

# PATRONS.

अहोबिलमठ श्री सन्निधिः ।

वानमामलै मठ श्रीस्वामिचरणाः ।

श्रीमत् आण्डवन् सन्निधिः ।

परकालमठ श्रीसन्निधिः ।

,, Raja Bahadur S. Aravamudu Iyengar, B. A., B. L. M. B. E.

,, Justice S. Varadachariyar, B. A., B. L.,

,, A. Srinivasa Iyengar, Mannargudi.

,, R. Gopalaswami Iyengar. Advocate, Madras.

,, K. Srinivasa Iyengar, Madurai.

,, J. Subramaniam, Advocate, Gopichettipalayam.

,, S. T. G. Varadacharyulu, Chittigudur.

,, M. Sankar Lal, Tirupati.

,, N. S. Chari, Bombay.

,, Seth Govind Babu Bangur, Calcutta.

,, T. V. Visvanatha Aiyer, Mylapore, Madras.

,, N R Srinivasa Iyangar, Madras.

,, K. Venkatachari, Bombay.

---

To

Sri ______________________________

______________________________

______________________________

---

Pirnter - J. Radhakrishnan,
R. K. Press, Tirupati.

R. K. Press, Tirupati. Copies—350.

REGISERED NO. H. 569

श्रीः

Book III No. 6-7

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

(अभिनवमाला)

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनि सद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ।

पु. ३] कलि ५०६९–प्लवङ्ग–कन्या–तुले [सं. ६–७

# THE UDYANA PATRIKA

A SANSKRIT MONTHLY
NEW SERIES.

SEPTEMBER-OCTOBER-1967

करधृतनवनीतं कालमेघाभिरामं
कमलनयनमेकं कलकं कामितानाम् ।
कलभमिव विलोलं कान्तकल्याणरूपम्
कलय हृदय कंचित् किंचिदुच्छूनकृत्रिम् ।

आशुकविसार्वभौमः

In case the previous issue is not received please inform the editor immediately.

Annual Subscription Rs. 3/— Foreign Rs 12/—

# UDYANA PATRIKA

## उद्यानपत्रिका

१ अस्या वार्षिकं मूल्यं त्रीणि रूप्याणि ।

२ ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।

३ एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।

४ प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः ।

५ एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः सम्पादकेन साकं कर्तव्याः । (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण ।)

६ लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

सम्पादकः; प्रकाशकश्च—
Mimamsarnava, Mimamsakesari, Panditaraja
**D.T. TATACHARYA SIROMANI,** M.O.L.
TIRUPATI.

---

## विषयाः

१. भारतमहासमाजः ।
२. प्रकृतिभेदः ।
३. अभयप्रदानसारः ।
४. अभिनवा दीपाः ।
५. सहधर्मचारिणी उत समधर्मचारिणी ।
६. रघुवंशः ।
७. श्री भद्राद्रिरामसुप्रभातम् ।
८. सुभाषितानि ।
९. कविसमयाः ।
१०. ईश्वरः - कर्षकश्च ।

# उद्यानपत्रिका ।

अन्या वाचो विमुञ्चथ ।

(अभिनवमाला)

वेदापहारविक्रोशद्द्वेधःखेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पुस्तकं ३] कलि ५०६९ –प्लवङ्ग– कन्या–तुले [सं. ६–७

**SEPTEMBER-OCTOBER - 1967**


969 SANSKRIT VIDYA

## भारतमहासमाजः (२)

अतीतसिंहमाससञ्चिकायां इमं विषयं प्रस्तुत्य "एतत्स्वरूप-धर्मादिकं कन्यासञ्चिकायां प्रकाशयिष्यते" इत्यवोच्चाम। अत्र असत्यसङ्कल्पा वयं अभूम। मनुष्या हि वयम्। ईश्वरवत् सर्वदा सत्यसङ्कल्पाः कथं भवेम।

"सर्वं परवशं दुःखं सर्वमात्मवशं सुखम्।" इत्याह सर्व-ज्ञानमयो मनुः। पत्रिकाप्रकाशनसम्बन्धि कार्यं बहु। तत् सर्वं प्रायः पराधीनं भवति। तथा पराधीनं यथा तज्जनितः क्लेश-भारः पदेपदे प्रकाशनप्रवृत्तेरुपरमं चिन्तनीयमापादयति। अनेन हेतुना मासद्वयार्थे इयं एका सञ्चिका कन्यामासमतीत्य तुलामासे बहिरागच्छति।

भारतमहासमाज इति कश्चन समाजः स्थापनीय इति, तस्य उद्देश्यं कृत्स्ने देशे जनानाँ सुखजीवनसिद्धये कर्तव्याकर्तव्य-विवेकसम्पादनमिति च अवोचाम। उद्दिष्टस्य अस्य समाजस्य स्थापनादिहेतोः प्रथमप्रवृत्तिः संस्कृतविद्याऽधिगमेन संस्कृतमतिभिः महद्भिः कर्तव्येति अस्माकमभिप्रायः। सुखजीवनँ नाम किम्? तस्य किं लक्षणम्। तत्सिद्धये आदरणीय उपायः कः? इत्येव-

मादयः प्रधानतमा विषयाः यथा संस्कृतग्रन्थेषु न तथा ग्रन्थान्तरेषु सम्यक् प्रतिपादिताः सन्ति । अतः एतदवधारणं संस्कृतविदां सुकरम् ।

मनुस्मृतिः याज्ञवल्क्यस्मृतिः इत्यादयः स्मृतिग्रन्थाः रामायणमहाभारतादयः उपबृंहणग्रन्थाश्च किल परिशील्यमानाः प्रकृतविषये अपेक्षितां बुद्धिं विशदां निश्चितां विपर्ययानर्हतया दृढां च जनयितुं क्षमन्ते । एते सर्वे संस्कृतविदां सुग्रहार्थाः । यद्यपि परीक्षादिरूपकारणान्तरवशात् एते ग्रन्था अधीता अध्यापिताश्च स्युः, तेन च प्रकृतविषयोपयोगितया तत्प्रतिपाद्यार्थाः न चिन्तिताः स्युः, तथापि ते देशक्षेमहेतोः यदि अनया दृष्ट्या तान् ग्रन्थान् अवलोकयेयुः तर्हि सुखं ज्ञास्यन्ति तत्प्रतिपाद्यसम्बन्धि परमं तत्त्वम् । असंस्कृतविदामिव क्लेशो वा विपरीतज्ञानं वा न भविष्यति । अनेन कारणेन संस्कृतवित्सु महत्सु सानुरोधां प्रार्थनां वयं चिरात् कुर्वन्तो वर्तामहे ।

संस्कृतविद्यारक्षणाय तद्वृद्धये च सश्रद्धं सादरं महान्तं प्रयत्नं कुर्वाणैरपि यत् यथातृप्ति उद्देश्यसिद्धिः न प्राप्यते तत्रेदं कारणं यत् संस्कृतविद्यायाः जनानां अद्यतनजीवनपद्धतेश्च सम्बन्धोऽत्यन्तं विच्छिन्नः । तयोः सम्बन्धः कश्चिदस्तीति न कश्चिज्जानाति । नास्तीत्येव भूयिष्ठानां मतिः । संस्कृतं अत्यन्तं लुप्यतां, जना जीविष्यन्त्येव, राज्यानि प्रवर्त्स्यन्त्येवेति मन्यन्ते । परन्तु अद्य विद्यमानाः, सार्वत्रिकाः, सर्वविषयाः, पदेपदे महान्तं क्लेशं सन्त्रासं च जनयन्तः, दिने दिने वर्धमानाः क्षोभाः विवेकिनां तत्त्वबुद्धिं न न जनयन्ति । यदभावात् इमे क्षोभाः भवन्ति, यत्सत्त्वे इमे न भविष्यन्ति तदस्ति किञ्चित् । तदुपदेश एव प्राचां संस्कृतग्रन्थानां परमोद्देश्यभूतः । तदिदं अतिसंक्षेपेण अतिविशदं च

उक्तम् —

**शमार्थं सर्वशास्त्राणि विहितानि मनीषिभिः ।**
**तस्मात् स सर्वशास्त्रज्ञो यस्य शान्तं मनः सदा ॥** इति,

**धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः ।** इति च ।

अतः यदद्य घोराः पदविषयाः स्पर्धाः असत्यैकनिष्ठा, विविधा हिंसा, वस्तूनाँ दाहभंजनादि च मुहुः मुहुः आसेतुहिमाचलं प्रवर्तन्त इति न परमेतावदेव अपितु उत्तरोत्तरं अनुवृत्तं भविष्यतीति च भाति, तत्प्रशमनोपायः शास्त्रोपदिष्ट एक एव । तस्य बोधनाय अनुष्ठानपर्यवसायित्वसिद्धये च संस्कृतविद्भिः प्रयतनीयम् । अत्र प्रथमप्रवृत्तिः भारतमहासमाजस्थापनरूपा भवितुमर्हतीति विज्ञापयामः ।

---

## प्रकृतिभेदः ।

(अनुवृत्तम्)

कल्पना— ननु रुचि-मामि, तस्मिन् दिने त्वमब्रवीः किल स्त्रीपुरुषधर्मं प्रति पश्चाद्द वक्ष्यामीति ।

रुचिः— आम्, अब्रवम् ।

कल्पना— कृपया अद्य ब्रूहि ।

रु— तस्मिन् दिने केनचित् प्रसङ्गेन तदवोचम् । तत् स्मरन्ती इदानीं आगत्य पृच्छसि । तत्र सन्तोष एव मे । अथापि पृच्छामि कुतस्तव तत्र इयती श्रद्धा ?

क— न, न मामि । तस्मिन् दिने अहं अतीव लज्जिता अभवम् ।

तदा प्रभृति तदेव स्मरन्ती अस्मि। कदा अवसरो लप्स्यते। कदा तदवबोधो मे भविष्यतीति उत्सुका अस्मि।

रु— साधु कल्पने। अद्यतन्यः कन्याः वृद्धानां अस्मादृशीनां व्यवहारेषु न श्रद्दधीरन्, प्रत्युत उपहसेयुः। त्वं तु न तादृशी भवसीति पश्यन्ती हृष्यामि।

क—सत्यं, तथा भूयिष्ठा भवन्ति। परं तु नाहं तथा। वृद्धानां मुखात् तत्तत् श्रोतव्यं, तत्तत् ज्ञातव्यमित्येव मम मतिः, ममाभिलाषः, मम कुतूहलम्।

क— साधु। शोभना ते प्रकृतिः। वक्तव्यं वदामि, शृणु। वधूवरयोः विवाहो भवति। तौ दम्पती भवतः। यावज्जीवं तयोः सर्वं सहितयोरेव। परं तु एकस्मिन् गृहे सर्वदा सहैव वसद्भ्यां ताभ्यां द्वाभ्यां कुटुम्बकृत्ये निर्वर्त्यमाने अभिप्रायभेदो यदि भवेत्, तत्र किं कर्तव्यम्? द्वैराज्यम् हि सर्वदा सर्वत्र अनर्थावहम्।

क— आं, मामि। मम पिता एकं वदति माता च अन्यद् वदति। एकस्य एकस्या वा अभिप्रायं इतरा इतरो वा नानुरुन्धे। तेन सर्वदा गृहे कलहः, आक्रोशः, रुदितं, सर्वं भवति। न परं पितृगृहे, श्वशुरगृहेऽपि एषा कथा।

रु— पश्य पश्य। दम्पत्योरैकमत्यविरहे इयं दुरवस्था कुटुम्बस्थितिं अतीव बाधेत। अतः दम्पत्योः ऐकमत्ये अतीव अवधानं कर्तव्यम्। सर्वप्रयत्नेन तद्रक्षणीयम्। तत्र क उपायः, तदर्थं किं कर्तव्यम्, इत्यादिकं प्रति पश्चाद् वक्ष्यामि। अद्य कालोऽतिपतितः। अस्ति कर्तव्यम्।

## दशमोऽधिकारः (अनुवृत्तः)

इत्थं येनकेनापि प्रतिबन्धुमशक्येन केनचिदुक्तिविशेषेण यथा-प्रमाणं शरणागतस्य अभिमतफलसिद्धिप्रकारं सामान्यतोऽभिधाय अथोपरि प्राप्तिप्रकारं विवृणोति।

**राघवेणाभये दत्ते सन्नतो** रावणानुजः ।
**विभीषणो महाप्राज्ञो भूमिं समव**लोकयन् ॥

राघवेण । माहात्म्यं पुरस्कृत्य अभयप्रदानं कर्तव्यम्। अथापि महात्माऽयं नाऽस्माकं उपसर्पणार्हः इति भयनिवृत्त्यनुगुणतया अवतारदशायां सौशील्यं अभ्यधिकमासीत्।

'दत्तमस्याभयं मया' इति स्वोक्तिः अपर्याप्तेति 'आनयैनं' इति महाराजमपि पुरश्चकार। सोऽपि 'अस्माभिर्हरिश्रेष्ठ' इति महाराजमपि पुरश्चकार। सोऽपि 'अस्माभिस्तुल्यो भवतु' इति विज्ञापयामास। एवं वीरेष्वपि अभ्युपगमं कृतवत्सु महत्यां गोष्ठ्यामुत्थाय "श्रीविभीषणमिश्रः अनुगृह्यते" इत्युदीरणानन्तरं भगवता कृतमभयप्रदानं प्रतिष्ठितमासीदिति ज्ञापनाय "अभये दत्ते" इत्ययमनुवादः ।

सन्नतः। सम्यक् नतः। शरण्यस्य निष्ठायां सौशील्ये च पारवश्यं गतः अन्यत्र सर्वत्र नमनं परिहृत्य तच्चरणमूले वसतिं लेभे। "विभीषणोऽनुगृह्यते" इत्यस्या अनुग्रहोक्तेः दूरादेव समुचितं उपचारं अकरोत्, इत्यपि भावो भवितुमर्हति।

रावणानुजः। 'न नमेयं' इत्यध्यवसायवता नमनरहितेन राक्षसेन अधिशयिते उदरे शयितस्य वरप्रभावेण नमनमिदं प्राप्तस्थले।

तदा प्रभृति तदेव स्मरन्ती अस्मि। कदा अवसरो लप्स्यते। कदा तदवबोधो मे भविष्यतीति उत्सुका अस्मि।

रु— साधु कल्पने। अद्यतन्यः कन्याः वृद्धानां अस्मादृशीनां व्यवहारेषु न श्रद्दधीरन्, प्रत्युत उपहसेयुः। त्वं तु न तादृशी भवसीति पश्यन्ती हृष्यामि।

क—सत्यं, तथा भूयिष्ठा भवन्ति। परं तु नाहं तथा। वृद्धानां मुखात् तत्तत् श्रोतव्यं, तत्तत् ज्ञातव्यमित्येव मम मतिः, ममाभिलाषः, मम कुतूहलम्।

रु— साधु। शोभना ते प्रकृतिः। वक्तव्यं वदामि, शृणु। वधूवरयोः विवाहो भवति। तौ दम्पती भवतः। यावज्जीवं तयोः सर्वं सहितयोरेव। परं तु एकस्मिन् गृहे सर्वदा सहैव वसद्भ्यां ताभ्यां द्वाभ्यां कुटुम्बकृत्ये निर्वर्त्यमाने अभिप्रायभेदो यदि भवेत्, तत्र किं कर्तव्यम्? द्वैराज्यम् हि सर्वदा सर्वत्र अनर्थावहम्।

क— आं, मामि। मम पिता एकं वदति माता च अन्यद् वदति। एकस्य एकस्या वा अभिप्रायं इतरा इतरो वा नानुरुन्धे। तेन सर्वदा गृहे कलहः, आक्रोशः, रुदितं, सर्वं भवति। न परं पितृगृहे, श्वशुरगृहेऽपि एषा कथा।

रु— पश्य पश्य। दम्पत्योरैकमत्यविरहे इयं दुरवस्था कुटुम्बस्थितिं अतीव बाधेत। अतः दम्पत्योः ऐकमत्ये अतीव अवधानं कर्तव्यम्। सर्वप्रयत्नेन तद्रक्षणीयम्। तत्र क उपायः, तदर्थं किं कर्तव्यम्, इत्यादिकं प्रति पश्चाद् वक्ष्यामि। अद्य कालोऽतिपतितः। अस्ति कर्तव्यम्।

## दशमोऽधिकारः (अनुवृत्तः)

इत्थं येनकेनापि प्रतिबन्धुमशक्येन केनचिदुक्तिविशेषेण यथा-प्रमाणं शरणागतस्य अभिमतफलसिद्धिप्रकारं सामान्यतोऽभिधाय अथोपरि प्राप्तिप्रकारं विवृणोति ।

**राघवेणाभये दत्ते सन्नतो रावणानुजः ।**
**विभीषणो महाप्राज्ञो भूमिं समवलोकयन् ॥**

राघवेण । माहात्म्यं पुरस्कृत्य अभयप्रदानं कर्तव्यम् । अथापि महात्माऽयं नाऽस्माकं उपसर्पणार्ह इति भयनिवृत्त्यनुगुणतया अव-तारदशायां सौशील्यं अभ्यधिकमासीत् ।

'दत्तमस्याभयं मया' इति स्वोक्तिः अपर्याप्तेति 'आनयैनं हरिश्रेष्ठ' इति महाराजमपि पुरश्चकार । सोऽपि 'अस्माभि-स्तुल्योभवतु' इति विज्ञापयामास । एवं वीरेष्वपि अभ्युपगमं कृतवत्सु महत्यां गोष्ठ्यामुत्थाय "श्रीविभीषणमिश्रः अनुगृह्यते" इत्युदीरणानन्तरं भगवता कृतमभयप्रदानं प्रतिष्ठितमासीदिति ज्ञापनाय "अभये दत्ते" इत्ययमनुवादः ।

सन्नतः । सम्यक् नतः । शरण्यस्य निष्ठायां सौशील्ये च पारवश्यं गतः अन्यत्र सर्वत्र नमनं परिहृत्य तच्चरणमूले वसतिं लेभे । "विभीषणोऽनुगृह्यते" इत्यस्या अनुग्रहोक्तेः दूरादेव समु-चितं उपचारं अकरोत्, इत्यपि भावो भवितुमर्हति ।

रावणानुजः । 'न नमेयं' इत्यध्यवसायवता नमनरहितेन राक्षसेन अधिशयिते उदरे शयितस्य वरप्रभावेण नमनमिदं प्राप्त-स्थले ।

**विभीषणः।** एकोदरशयितत्वेऽपि 'विभीषणस्तु धर्मात्मा न तु राक्षसचेष्टितः' इति कुम्भकर्णादिभ्यो जात्यन्तरतया ख्यातिं गतः।

**महाप्राज्ञः।** स्वस्य क्षणमात्रविलम्बे भगवान् न ध्रियेतेति दूरत एव इङ्गितेन ज्ञातुं शक्तो महाबुद्धिमान्।

**भूमिं समवलोकयन्।** भगवतः शरणागतवात्सल्यं, प्रथमं भगवन्तमाश्रितानाँ वीराणां सम्पन्नं लाभं च दृष्ट्वा दुष्प्रकृतीनां रावणादीनामपि गुणाधानमुद्दिश्य हितोपदेशार्थं आनृशंस्येन वात्सल्येन च इयन्तं कालं यत् विलम्बं अकरोत् तत्र लज्जितत्वा मूर्धानं अवनतं चकार। पूर्वं शिलादण्डहस्ता स्थिताँ गोष्ठीं वीक्ष्य भीतः तस्थौ। अद्य वीरान् सर्वान् मुक्तविषये आतिवाहिकवत् प्रशंसतः मङ्गलाशासनपराँश्च अवेक्ष्य 'अहो, शरण्याधिष्ठितस्य दिव्यदेशस्य प्रभाव इति तं देशमवलोकयामासेति वा। शिलाः दण्डाँश्च अपास्य हस्तेन अञ्जलिना च प्रतीच्छतां गोष्ठ्याँ दण्डप्रणामकरणाय स्थलमवैक्षतेत्यपि वा।

अस्मिन् श्लोके सन्नत इति वाक्यार्थपरिसमाप्तिः। 'खात् पपात' इत्युपरि अन्वयो वा।

**खात् पपातावनिं हृष्टो भक्तैरनुचरैः सह।**

स्वशेषभूतत्वात् परतन्त्रत्वाच्च स्वपाणिपादवत् स्वस्मिन् अन्तर्गतैः पृथगुपायफलरहितैः चतुर्भिः राक्षसैः सह उद्देश्यभूतश्रीमच्चरणपर्यन्तगमनाक्षमत्वं आपादयता हर्षपारवश्येन नुन्नः जन्मना चरणसम्बन्धवत्यां भूमौ पपात।

पुरा रावणस्थाने पतितत्वा आरोपितं रजः सर्वं यथा अपनीतं भवेत् तथा अमानवकरस्पर्शवत् अत्यन्तशोधके भगवतः अग्रे भूमौ पतित्वा श्रीमच्चरणस्पर्शयोग्यो भूत्वा तत उत्थाय

आगत्य श्रीमच्चरणाश्रितं स्वशिरः कर्तुं यत् पपात, तत्प्रकारमाह—

**स तु रामस्य धर्मात्मा निपपात विभीषणः।**
**पादयोः शरणान्वेषी चतुर्भिः सह राक्षसैः॥**

स तु। लीलाविभूतिस्थानां केषाञ्चित् "यूयं यूयं वयं वयम्" इति रीत्या आगन्तुकैः बन्धुभिः सह सम्बन्धं छित्वा संसारसमुद्रं तीर्त्वा विष्णुपदाश्रयणे यद् वैलक्षण्यं जायेत तदिवास्य वैलक्षण्यमभवत्।

रामस्य। विभीषणमिश्रस्य बहुमुखपरिभवजनितसर्वपरितापशमनक्षमतया रमणीयमासीत् दशरथप्रसूत मरकतमणिस्थलम्।

धर्मात्मा। इतरधर्मविलक्षणः शरणागतिधर्मः मूर्तिमानिव आसीत्।

पादयोः शरणान्वेषी। स्वेन परमसाम्यं दत्वा स्वचरणारविन्दयोरधस्तात् निवासयति यः तस्य परमात्मनः दिव्यचरणयोः स्वस्य शाश्वतं स्थानं इयेष।

पादयोः निपपात, इत्यप्यन्वयः। इदं श्रीवैकुण्ठनाथस्य श्रीमच्चरणौ मुक्तो यत् प्राप्नोति, तस्य प्रत्यायनम्।

इत्थं कश्चित् शरणागतः सन् श्रीमच्चरणौ यदा विन्दति, तदा तदाश्रितानामपि तदीये आत्मात्मीयभरसमर्पणे अन्वितत्वात् पृथक् शरणागत्यपेक्षां विना, पृथक् परीक्षां विना च राजसेवकस्तनन्धयानामिव पुरुषार्थलाभस्तुल्य इति

पशुर्मनुष्यः पक्षी वा ये च वैष्णवसंश्रयाः।
तेनैव ते प्रयास्यन्ति तद् विष्णोः परमं पदम्॥

इत्यादिषु उक्तं शास्त्रार्थं प्रकटयति—चतुर्भिः सह राक्षसैः, इति।

# अभिनवा दीपाः।

## (प्रथमे त्रयो भक्ताः)

D.R.

### (अनुवृत्तम्)

प्रबन्धानामवतार एव अस्ति किञ्चिद् वैलक्षण्यम्। वेदानां अनादित्वात् अपौरुषेयत्वाच्च न कश्चिद् वेद कदा ते उदभवन्, कस्य वा सन्निधौ ते प्रथमं श्राविता इति। इतिहासप्रकाण्डं रामायणं वाल्मीकिमहर्षिणा निबद्धमिति, श्रीरामस्य सन्निधौ गीतमिति च वयं जानीमः। परं तु तस्मिन्नवसरे तत्र देवी सीता न सन्निहिता आसीत्। दिव्यप्रबन्धाः पुनः दिव्यदम्पत्योः साक्षात् श्रीनारायणयोः सादर सङ्कल्पानुग्रहाभ्यां प्रादुरभवन्। तौ तेषां प्रवर्तकावास्ताम्। साक्षात् तयोः सन्निधौ च "रङ्गारोहणोत्सवः" वृत्तः। अतो नेदं विस्मयपदं यत् यत्र द्रमिडभाषायाः साम्राज्यं तस्मिन् अस्मिन् दक्षिणभारतप्रदेशे पुमांसः स्त्रियश्च आध्यात्मिकविषयेषु भूयिष्ठं कुतूहलं उपदेशं च प्रबन्धमुखेन अलभन्त लभन्ते च। श्रुतीः अस्मभ्यं उपकृतवतां प्राचां ऋषीणां वाचः एषां त्रयाणां आद्यानां, अन्येषां च भक्तानां अनुभवैः सत्यापिता अभवन्। 'प्रथमभक्ताः' इत्येव एषां त्रयाणां व्यवहारः। ऐतिह्यं श्रावयति यत् आश्वयुजे (तुला) मासे श्रोणायां सरोमुनिरजायत, श्रविष्ठायां भूतमुनिः, शतभिषजि वेतालमुनिरिति।

'दिव्यदेशाः' इति व्यवह्रियमाणानि विष्णुक्षेत्राणि अष्टोत्तरशतम्। तेषु विशिष्टं बहुमततरं च श्रीगोपपुरं (तिरुक्कोवलूर्) यतः तत्र उक्ता कथा वृत्ता, प्राचीनतमाः दिव्यप्रबन्धाश्च प्रादुरभवन्। तस्मिन् पुरे कस्यचिद् गृहस्य देहल्यां प्रज्वलिता दीपाः तत्त्वजिज्ञासुसन्ततीनां प्रकाशं ददतो वर्तन्ते। कस्यचिद् गृहस्य

देहल्याँ प्रज्वलिता दीपाः तत्त्वजिज्ञासु सन्ततीनाँ प्रकाशं ददतो वर्तन्ते। देहल्याँ उत्तान्नोऽयं सत्यदीपः कृत्स्नस्य देशस्य अन्धकारं निवर्तयामास, वेदान्तमार्गं च प्रकाशयामासेति श्रीमान् निगमान्तमहादेशिकः रमणीयया एकया गाथया प्रतिपादयति। क्षेत्राधिपतिर्भगवान् सहस्रनामस्वप्यपठितानि अभिनवानि नामानि लेभे। भक्ताः "देहलीशः" इति, "भक्तोपमर्दरसिकः" इति च तं कीर्तयन्ति। श्रीमान् निगमान्तमहादेशिकः "भगवान् इक्षुदण्ड। सः भक्तत्रयरूपेण यन्त्रेण पीडितः। ततो रसप्रवाहः। अयं शर्करारूपेण परिणामं गच्छति। इयं शर्करा दिव्यप्रबन्धाः" इति देहलीशस्तुतौ वर्णयति। तदा प्रभृति देहलीश इति कीर्त्यमानः आनन्दी भवति।

आश्वयुजः दीपावलीमासः। यदिमे त्रयोपि भक्ताः अस्मिन् मासे प्रादुरभवन् तत् किं केवलं याद्दच्छिकं अथ वा भगवद्भक्तानाँ तत्त्वावलोकनाय आनन्दानुभवाय च भागवतोत्तमैः आरोपितानाँ एषाँ दीपानां आवलिः पारमार्थिकी दीपावलिरिति ज्ञापकम् ?

तृतीयो वेतालमुनिः परतत्त्वं प्रथममपश्यत्, प्रख्यापयामास च। परतत्त्वं, न केवलः पुरुषः, नापि केवला स्त्री। अपि तु द्वन्द्वं अन्योन्यलक्ष्यं अन्योन्यसक्तं च। इदमेव तत्त्वं हितं, पुरुषार्थश्च। प्राञ्चो वेदाः देवं देवीं च पृथक् दर्शयन्ति स्म पुरुषसूक्तेन श्रीसूक्तेन च। अभिनवदीपास्तु यथा दीपः तत्प्रभा च तथा अनन्यौ अविभागार्हौ ताविति अदर्शयन्।

---

लीलायष्टिमनोज्ञदक्षिणकरो बालार्कतुल्यप्रभः
फालावेशितदिव्यरत्नतिलको मालावलीमण्डितः।
चेलावेष्टितमौलिमोहित जनः चोलावनीमन्मथः
वेलातीतदयारसार्द्रहृदयः मे लालितो मौलिना ॥

आशुकविसार्वभौम श्रीनिवासराघवाचार्यः

# सहधर्मचारिणी उत समधर्मचारिणी ?

P. Ramamurthy, M.A.

(अनुवृत्तम्)

अविवाहितः अंबुजाक्षः भ्रातुः भास्करस्य गृहे बहून् संवत्सरान् अनयत्। भ्रातृभार्या भानुमती अस्वतन्त्रा कर्तव्येषु सर्वेष्वपि कर्मकलापेषु भर्तुः आज्ञां अनुमतिं वा अपेक्षत। "नाथ, अर्धरूप्यं अधुना दत्त। अयं शुक्रवासरः। पुष्पाणि क्रेतव्यानि। क्रीतपूर्वं इदं वस्त्रं जीर्णम्। नूतनं वस्त्रं उचितं भाति। अस्मदपत्यस्य मन्दो ज्वरः। दत्तैः कषायलेह्यादिभिः अच्छेद्यः वर्तते, वर्धते च। चिकित्सकानयनं अथवा चिकित्सालयगमनं अपरिहरणीयम्" इति उचितेषु सन्दर्भेषु जातेषु भर्तृमुखवीक्षणेन तस्य मनःप्रवृत्तिं अनुमाय याचेत। भास्करोऽपि बधिर इव तिष्ठेत्, यतः सः अकिञ्चनः, भूरिकुटुंबभारभग्नश्च अभवत्। यस्मिन् दिने सः भानुमत्याः प्रार्थनां सफलां अकरोत्, तस्मिन् दिने अभिनवैः भानवीयैः अंशुभिः विकसितं अरविन्दमिव तस्याः मुखं शोभेत।

परिचितवस्तुप्राप्तये हि मनः मुह्यति। "यदि भ्रातृभार्यासमानां भार्यां अहमपि लभेय, नूनं भाग्यवतां धुरि स्थापनीयः स्याम्" इति लब्धबीजावापः अंबुजाक्षस्य मनोरथः वटवृक्ष इव ववृधे। अधुना भ्रातृपत्नीं आत्मपत्नीं च तुलायां निक्षिप्य अधरोत्तरं निर्णेतुं सः चकमे। सुदीर्घं निश्वस्य," भर्तृशासने तिष्ठन्ती भानुमती क्व, भर्तुः अनुज्ञां — अस्तु तावत् आज्ञा—अनपेक्षमाणा चारुमती क्व" इति वचनानि तस्य जिह्वा उज्जगार।

तदा उदियाय तस्य मनसि विवाहकाले भानुमत्या भणितानि वाक्यानि, "अंबुजाक्ष, यत् उचितं अवश्यं च, तत् शंसितुं जननीसमानायाः मम अयमेव समयः। चारुमती नूनं सर्वाङ्ग-

सुन्दरी। सर्वथा तव अनुरूपा। तथाऽपि, सा प्रबले व्यापारालये अधिकृता अस्ति। परिणीतानाँ कुटुंब युवतीनां एव कार्यालयः। यदि सा इतः परमपि अधिकृता भविष्यति, नूनं कदाचित् दाँपत्य-कलहः जायेत। सागरे बडवानल इव संसारसागरे समुत्थितः दाँपत्यकलहः पश्चात्तापवारिणाऽपि अशम्यः यावज्जीवं दहेत्" इति।

अनेन उपदेशमानदण्डेन अंबुजाक्षः चारुमतीं अमात्। "बोनस्-धनलाभमात्रेण कथं सा तस्य स्वामिनी स्यात्? यदि स्वामिनी, किं नाहं स्वामिन्याः स्वामी?। स्वामीति पदं विना कथं स्वामिनीत्वं संभवेत् व्यवहारे व्याकरणे च?। तत् धनं सर्वं स्वामिनः भर्तुः मम हस्ते निधाय, माँ नमस्कृत्य, मम आशिषः अवाप्य, मम अनुमत्यैव सा मया अभीप्सितानि वस्तूनि क्रेतुं अधिकारं भजते। भर्तुः अनुमत्या हि भार्या अधिकृता भवति, धनं च आप्नोति। अतः तत् धनं भर्तुः अधीनम्, सहधर्म-चारिणीत्वात् तस्याः" इति नैयायकरीत्या तर्कयन्, धूलिधूसरित-स्विन्नगात्रः भ्रातृभवनं अयात्।

आयान्तं अंबुजाक्षं वीक्षमाणौ क्रीडन्तौ भास्करबालकौ, "कुट्टि-अप्पा आगतः" इति हस्तताडनेन घोषेण च स्वागतं व्याज-ह्रतुः। बहिरागतः भास्करः, "अपि कुशली त्वम्? कथं एकाकी आगतवान्?। कच्चित् चारुमती कुशलिनी?। चक्रवाकौ विरहं न सहेते" इति सहेलं सवात्सल्यं बभाषे।

"तां विनैव अहं आगच्छम्" इति अंबुजाक्षः निरुत्साहेन ध्वनिना प्रत्यभाषत, विनेति पदोच्चारणे उचिताधिकां दृढतां द्योतयन्।

"अंबुज, 'बोनस्' धनं त्वया, चारुमत्या च लब्धं स्यात्। त्वया अधिगतं बोनस्धनं सहस्त्रयं पैतृकस्य ऋणस्य क्षिप्रापनोदनाय दातव्यमित्यहं अवैमि। चारुमत्या कियत् अवाप्तम्, आशु ब्रूहि" इति निरबध्नात्।

"अवाप्तमित्येव तया भणितम्। कियदिति न निवेदितम्। मया च अनुत्साहिना न पृष्टम्" इति सः प्रत्यूचे।

"अंबुज, शतं रूप्याणि देहि। तव भ्रातृभार्या आमिषं गृध्र इव माँ अत्ति। कथं सप्राणः श्वसिमि इति अहमपि न जाने। गते मासत्रये आनखशिखव्यापिनीं नरकसमानाँ व्यथां काष्ठभूतेन शरीरेण वहामि" इति विरक्तः व्याजहार।

"भ्राता वा भणति?। क्षमया पृथ्वीसमां आर्यां भानुमतीं वा गृध्रसमानाँ व्याख्याति?।" इति अंबुजाक्षः अन्तर्गूढचिन्ताजडः अतिष्ठत्।

सहोदरस्य मुखमुकुरे प्रतिबिंबितं आन्तरं आश्चर्यं पश्यन्, भास्करः, "वत्स, मासत्रयात् प्राक् भानुमत्याः अनुजस्य परिणयश्चचालेति त्वं वेत्सि। तदा तस्याः पिता नूतनं पट्टवस्त्रं क्रेतुं शतं रूप्याणि पारितोषिकतया अदात्। आधुनिके काले सर्ववस्तुमूल्येषु नभोमार्गगामिषु, नूतनं क्षौमवस्त्रं रूप्यशतेन क्रय्यं भवति किम्? अतः सा "अधिकं रूप्यशतं राशीकृत्य, शतद्वयाय उत्तमाँ काञ्चीपुरपट्टचेलां क्रीणन्तु भवन्तः इति वदन्ती पैतृकं रूप्यशतं रक्षणाय अदात्। पेटिकान्यस्तं धनं तथैव तिष्ठति किम्। धने अल्पेऽपि हस्तस्थिते, व्ययौघाः अहमहमिकया आयान्ति। तत् शतं कुटुंबभरणायैव मया अर्पितम्, न आत्मसुखाय। भानुमती एतत्सर्वं जानाति। तथापि "मम पित्रा प्रेम्णा दत्तं मदीयं रूप्यशतं दत्त"

इति प्रतिदिनं उन्मत्त इव श्वा मां भषति। स्त्रियस्तस्मात् पुरुषैः आनीतं धनं यथाकामं व्ययीकुर्वन्ति। व्ययद्योतनिकामपि न प्रदर्शयन्ति। पुरुषैः पृष्टाः आविष्टा इव आलपन्ति, प्ररुदन्ति, न पचन्ति च। यदि वयं तासां धनं—अस्माकं आर्जनादेव मुषितं —अङ्गुल्यग्रेण स्पृशामः, कष्टात् कष्टतरं पदं प्राप्य विषीदामः। प्रथमोऽयं प्रमादोत्पन्नः अनुभवः मां प्रमथ्नाति" इति स्तंभित-बाष्पजलः उद्ववाम।

"अंबुज, अवहितः शृणु। श्रुत्वा न्यायं निर्णय। पुत्र-दारपोषणं कस्य धर्मः ?। किन्न भर्तुः ?। तं धर्मं निरवद्यतया कर्तुं भार्याधनोपयोगः भर्तृ-गौरवगिरिं किन्न भिनत्ति ?। किन्न एतत् शीलं पर्याप्तवित्तसंपादनपङ्गुतां बोधयति ?। मम पूज्येन तातेन वितीर्णस्य रूप्यशतस्य व्ययः तव भ्रात्रा कृतः प्रथमापराधः। तस्य प्रत्यर्पणे जातः कालविलंबः अमर्षणीयः द्वितीयः अपराधः। एवंविधैः आत्मपरायणैः गूढविप्रियकारिभिः पुरुषैः अबलाः भार्याः प्रतार्यन्ते" इति आक्रोशत् भानुमती, भार्याधर्मसाम्राज्यस्य अंबुजा-क्षेण कल्पिता मानसी महिषी।

स्तंभितसकलेन्द्रियग्रामे अंबुजाक्षे अचलायमाने भास्करः, "अनुज, रूप्यशतं दास्यसि वा न वा ?। प्रत्युत्तरं च अधुनैव ब्रूहि" इति निर्बबन्ध।

"बोनस्-धनं चारुमत्या अवाप्तं तस्याः स्वं भवति। अनु-जोऽपि ऋणविमोचनाय लब्धं सहस्रत्रयं दत्वा कुटुंबभरणाय भवन्त इव भार्याधनं अपेक्षते चेत्, विज्ञप्तिः विफला हि भवेत्। अतः नायं प्रत्युत्तरदाने प्रभुः भवति" इति भानुमती आचिक्षेप।

"अयि अविनीते, वाचं विना तिष्ठ। चारुमती त्वमिव न असभ्यं वदेत्, अश्लीलं आचरेत्। तवैव अल्पं रूप्यशतं अनल्पं भाति। प्रतिक्षणं "मदीयं रूप्यशतम्" इति विवेकं विनयं च विना साटोपं नृत्यसि। एतत् अल्पादत्यल्पं शतरूप्यं बहुमन्यमाना मामपि अवमन्यसे। चारुमती प्रतिमासं शतपञ्चकं संपादयति। त्वमिव सा "इदं मदीयम्" इति उन्मत्ता, अवलिप्ता किं आक्रोशति इति अंबुजाक्षात् अवेहि। रे अनुज, प्रियोक्तं किन्न सत्यम्" इति भास्करः भग्नहृदयः आबभाषे।

## रघुवंशः

(द्वितीयः सर्गः)

**किमप्यहिंस्यस्तव चेन्मतोऽहं यशःशरीरे भव मे दयालुः।**
**एकान्तविध्वंसिषु मद्विधानां पिण्डेष्वनास्था खलु भौतिकेषु॥ ५७**

किमपि केनापि कारणेन, अहं दिलीपमहाराजः, तव ते, अहिंस्यः हिंसानर्हः (इति), मतश्चेत् अभिप्रेतो यदि, मद्वधे तव अभिप्रायो नास्ति चेदित्यर्थः। मे मम, मदीये, यशःशरीरे यशः रक्ष्यं अवश्यं रक्षतीति कीर्तिः, तद्रूपं यत् शरीरं तस्मिन्, दयालुः दयावान्, यशःशरीररक्षणप्रवण इति भावः। भव एधि। मम हिंसा न कर्तव्येति तवाभिप्रायो लक्ष्यते, यतः 'तद्रक्ष कल्याणपरम्पराणां भोक्तारम्' इति वदसि। मम हिंसा नाम मच्छरीरहिंसैव। आत्मनो नित्यत्वेन हिंसानर्हत्वात्। यदेवं मच्छरीरहिंसां कर्तुं त्वं नेच्छसि तत्र किं कारणमिति चिन्तयन् दयैवेति तर्कयामि। तत्र किञ्चिन्मे वक्तव्यमस्ति। ब्रवीमि, शृणु। मम द्वे शरीरे — इदं प्रत्यक्षं दृश्यमानं पाञ्चभौतिकं एकम्। अपरं यशोरूपम्। तत्र यशःशरीरे

दयां कुरु, तस्य हिंसां मा कुरु। नन्दिनीशरीरेण पारणां निर्वर्त्य स्वस्थं मां यदि मुञ्चसि तर्हि गुरोर्धनं रक्षणीयं अरक्षित्वा आत्मरक्षणपरो महाराजोऽभवदिति महत् अयशो हि मे भवेत्। एवं यशोहिंसायाः कारणं त्वमेव भवेः। अतः यशःशरीरे दयां कुरु, तस्य हिंसां मा कुरु। भौतिकशरीरेऽस्मिन् दयां मा कुरु, अस्य हिंसां कुरु, अनेन पारणां निर्वर्तय। नन्दिनीं मुञ्च, इति भावः।

येन अस्मिन् लोके पुरुषो जीवति तत् तस्य शरीरम्। यशस्विनो महापुरुषाः भौतिके शरीरे मृतेऽपि यशसा चिरं जीवन्ति। जनैः सदा स्मर्यमाणत्वात्, कीर्त्यमानत्वाच्च। अतः यशोऽपि यशस्विनां शरीरम्।

भौतिकशरीरापेक्षया यशःशरीरस्य को विशेषः, येन ते तत्र अधिक आदर इत्यत्राह— एकान्तेति। एकान्तेन नियमेन विध्वंसिषु नश्वरेषु, नाशवत्सु, भौतिकेषु पृथिव्यादिभिः पञ्चभिः महाभूतैः आरब्धेषु, पिण्डेषु शरीरेषु, मद्विधानां मम विधेव विधा जीवनपद्धतिः येषां तेषां, अनास्था खलु अनपेक्षा किल, अनादरः किल। क्लृप्तस्य वयसोऽन्ते इदं शरीरं अवश्यं नंक्ष्यति। न तथा, यशःशरीरम्। चिरं तत् स्थास्यति। स्थिरं विहाय अस्थिरे कस्य आस्था भवेत्। तस्मात् त्वया प्रदर्श्यमाना दया तच्छरीरं प्रति भवितुमर्हति, न तु इदं शरीरं प्रतीति।

किमपीति कुतोऽपि कारणादित्यर्थे महाकवयः प्रयुञ्जते। "किमप्यमर्षोऽनुनये भृशायते" इति भारविः। मम यो धर्मः आर्तपरित्राणरूपः तद्वतां सर्वेषां एवमेव स्थितिरिति स्फुटतरप्रतिपत्त्यर्थं मादृशानामित्यनुक्त्वा मद्विधानामित्याहेति विभाव्यम्॥

**सम्बन्धमाभाषणपूर्वमाहुर्वृत्तः स नौ सङ्गतयोर्वनान्ते।**
**तद्भूतनाथानुग नार्हसि त्वं सम्बन्धिनो मे प्रणयं विहन्तुम्॥ ५८**

सम्बन्धं मनुष्याणां परस्परं अनुबन्धं, आभाषणपूर्वं आभाषणं सल्लापः पूर्वं पूर्ववर्ति कारणं यस्य तं, आभाषणजन्यमित्यर्थः। आहुः प्राज्ञाः वदन्ति। अस्ति मनुष्याणाँ मिथः बहुधा सम्बन्धः-पिता पुत्रः, अग्रजः अनुजः, मातुलः भागिनेयः, श्वशुरः जामाता, स्यालः भगिनीपतिः, इत्येवमादिः। अयं जन्मकृतः बन्धुभावः। अस्त्यन्यः विद्याकृतः आचार्यः शिष्यः इति। अस्ति इतोऽप्यन्यः यः आभाषणेन जायते। अयं सौहार्दरूपः।

काममेवम्। ततः किमिति चेदाह – वृत्त इति। सः सम्बन्धः, वनान्ते वनस्य अरण्यस्य अन्ते यत्र अवसानं तत्र, अस्मिन् हिमवद्गुहाप्रदेशे, इत्यर्थः। सङ्गतयोः मिलितयोः, नौ आवयोः, वृत्तः जातः। इयन्तं कालं हि आवां अन्योन्यं भाषणं अकार्ष्व। अनेन आवयोः सम्बन्धः निष्पन्नः। न चात्र विप्रतिपत्तिः कार्या। आभाषणेन सम्बन्धो जायत इत्याप्तवचनस्य प्रमाणत्वात्।

अस्त्वेवं सम्बन्धो जातः। ततोऽपि किमित्यत्राह – तदिति। तदित्यव्ययं तस्मादित्यर्थे। हे भूतनाथानुग भूतनाथस्य भगवतः अष्टमूर्तेः अनुग अनुचर, किङ्कर, त्वं, सम्बन्धिनः जातत्वत्सम्बन्धस्य, त्वत्सम्बन्धवतः, मे मम, प्रणयं अभ्यर्थनाँ, विहन्तुं प्रतिषेद्धुं, नार्हसि न योग्योऽसि।

प्रतिष्ठिताभिर्युक्तिभिः स्वपक्षस्य सिंहेन अङ्गीकर्तव्यतां सम्यङ् निरूपयामास। अथापि सिंहस्य अयमभिप्रायः स्यात् – "कामं त्वयोच्यमानं साधु। तथा करणं युक्तम्। तथापि मम, नन्दिनीशरीरेण पारणाकरणमेव अभिमतं, न तु त्वदीयेन शरीरेण।

स्वच्छन्दोऽहं यन्मे अभिमतं तत् करिष्यामि। त्वदिच्छानुसारेण मया आचरितव्यमिति को निर्बन्धः।" इति। एवमुत्प्रेक्ष्य तत्र उत्तरमाह। प्रभुभिः स्वसम्बन्धिनां अपेक्षा पूरणीया। एषु अनन्यगतिकतया किञ्चिदपेक्षमाणेषु स्वाच्छन्द्यात् किमप्यहं करिष्यामीति विपरीतं नाचरणीयम्। सम्बन्धविरहेऽपि गुणवद्भिः परेषां याच्ञा पूरणीया। किमुत सम्बन्धे सति। सम्बन्धिनामनुग्रहार्थैव हि प्रभूणाँ बलं ऐश्वर्यमित्यादि। अतो मत्प्रार्थना अवश्यं पूरणीयेति। परां काष्ठां दैन्यस्य प्रदर्शयन् भूतनाथानुगेति सम्बोधयति। भगवान् हि आश्रितत्राणपरायणः। तत्किङ्करैरपि तच्छीलैर्भाव्यम्। अतः इतः परं किमपि अब्रुवन् गाँ मुञ्च, माँ भक्षयेति व्यञ्जयामास॥

**तथेति गां मुक्तवते दिलीपः सद्यः प्रतिष्टम्भविमुक्तबाहुः।**
**स न्यस्तशस्त्रो हरये स्वदेहमुपानयत् पिण्डमिवामिषस्य॥ ५९**

तथा यथा त्वं वदसि तथैव भवतु, इति इत्युक्त्वा, गाँ नन्दिनीं, मुक्तवते तस्याः पृष्ठात् अवरुह्य ताँ निवृत्तपीडां कृतवते, हरये सिंहाय, सद्यः सपदि, यस्मिन् क्षणे गौर्मुक्ता तस्मिन्नेव क्षणे प्रतिष्टम्भात् प्रतिबन्धात्, निश्चलत्वावस्थातः, विमुक्तः निष्क्रान्तः बाहुः भुजः यस्य तथाभूतः, न्यस्तशस्त्रः न्यस्तं भूमौ क्षिप्तं शस्त्रं बाणसहितचापरूपं आयुधं येन तथाभूतः(च), सः सिंहः स्वप्रार्थनामङ्गीकृतवान् इति प्रहृष्टः दिलीपः, स्वदेहं स्वकीयं शरीरं, आमिषस्य मांसस्य, पिण्डमिव गोलमिव, उपानयत् समीपमगमयत्। पाणिपादमाकुञ्च्य, शिरोऽवनमय्य वक्षोलग्नं कृत्वा देहं माँस पिण्डवत् कृत्वा सिंहस्य भक्षणं सुकरं यथा भवेत् तथा तत्समीपं गत्वा अतिष्ठदिति भावः।

'तथेति गामुक्तवते' इति पाठे तथेति वाचमुक्तवत इत्यर्थ इति स्पष्टम्। सन्न्यस्तशस्त्र इति युक्तः पाठः। "हे मदीय धनुः हे शर, इतः परं युवाभ्याँ न मे किमपि कार्यम्" इति तत्सन्न्यासं आत्यन्तिकं परित्यागं कृतवानिति भावः। हरये सिंहरूपाय विष्णवे। आत्मयज्ञोऽयम्। स्वदेहम्। नन्दिनीदेहमोचनाय स्वदेह उपयुज्यत इति तस्य हर्षं उत्साहश्चेति स्वशब्दव्यङ्ग्यम्। सद्यः प्रतिष्टम्भविमुक्तबाहुः। सद्यः न्यस्तशस्त्रः। सद्यः उपानयत्॥

**तस्मिन् क्षणे पालयितुः प्रजानामुत्पश्यतः सिंहनिपातमुग्रम्।**
**अवाङ्मुखस्योपरि पुष्पवृष्टिः पपात विद्याधरहस्तमुक्ता॥ ६०**

तस्मिन् यस्मिन् स्वदेहं उपानयत् तस्मिन्, क्षणे, विलम्बलवलेशमपि विनेति भावः। उग्रं घोरं, दुःसहं, सिंहस्य स्वोपरि निपातं आप्लुतिं, उत्पश्यतः प्रतीक्षमाणस्य, अवाक् अवनतं मुखं यस्य तस्य, अधोमुखस्य, प्रजानाँ पालयितुः राष्ट्रनिवासिनां जनानां सर्वेषाँ रक्षकस्य दिलीपस्य, उपरि, विद्याधराणां सुखजीविनाँ कलारसिकानाँ ऊर्ध्वलोकविशेषवासिनाँ जातिविशेषाणां हस्तैः करैः मुक्ता निपातिता, पुष्पाणां वृष्टिः, पपात अपतत्।

तस्मिन् क्षणे सिंहनिपातमुत्पश्यत इति, तस्मिन् क्षणे पुष्पवृष्टिः पपात, इति चान्वयः। पालयितुः प्रजानामित्यनेन स्वधर्मात् आपद्यपि अस्खलितोऽयमिति महाराजस्य प्रशंसा अभिप्रेता।

ननु 'विद्याधरमुक्ता' इत्येव पर्याप्तम्। हस्तमुक्तेत्यनपेक्षितम्। न। भूलोके प्रवर्तमानस्य अस्य अद्भुतस्य दिदृक्षया चिरात् पूर्वमेव वियति कल्पवृक्षपुष्पभारैः सह आगत्य स्थिता विद्याधराः अवसरे वर्षणाय पुष्पाणि हस्त एव अधारयन्। अधस्तात् निक्षेपे हि तद्ग्रहणप्रवृत्तिकृतः कश्चन विलम्बो भवेत्। तत्परिजिहीर्षया

हस्त एव धारणम्। अतो तेषां हस्तैर्मुक्तेति। अनेन तेषां कुतूहलातिशयः, तेन महाराजवृत्तान्तस्य अद्भुतत्वं च व्यज्यते। विद्याधरेति ऊर्ध्वलोकवासिनामुपलक्षणम्॥

**उत्तिष्ठ वत्सेत्यमृतायमानं वचो निशम्योत्थितमुत्थितः सन्।**
**ददर्श राजा जननीमिव स्वां गामग्रतः प्रस्रविणीं न सिंहम्॥ ६१**

हे वत्स प्रियपुत्रक, उत्तिष्ठ इदानीं मांसपिण्डवत् आत्मानं कृत्वा यद् वर्तसे, तामवस्थां परित्यज्य उत्थितो भव", इति इत्येवंरूपं, अमृतायमानं अमृतवदाचरत्, अमृतोपमं, श्रवणमधुरं, वचः वाक्य उत्थितं उत्पन्नं, निशम्य श्रुत्वा, राजा दिलीपः, उत्थितः सन् उत्थाय तिष्ठन्, अग्रतः स्वस्य पुरतः, प्रस्रविणीं क्षीरस्राववतीं, स्वां जननीमिव स्वमातरमिव स्थितां, गां नन्दिनीं ददर्श अपश्यत्। न सिंहं सिंहं नापश्यत्।

प्रतीक्षितः सिंहनिपातः स्वोपरि नाभूत्। किन्तु तत्स्थाने मृदोः कुसुमराशेः निपातः अभूत्। स्पर्शेन, भूमौ परितः पतितकुसुमदर्शनेन च तत् जानन्नपि दिलीपः माँसपिण्डावस्थां अजहत् तथैव अवतस्थे। तदा "वत्स, उत्तिष्ठ" इति काचन वाक् उदभूत्। तां अयं शुश्राव। वात्सल्यस्यन्दिन्याः तस्या वाचो माधुर्यातिशयः आप्तवागिप्रमिति निश्चितां मतिं दिलीपस्य उत्पादयामास। तेन तद्विधेयो भवत् उदतिष्ठत्। ऊधसि क्षीरप्रस्रवणेन वात्सल्यातिशयं स्वस्मिन् अभिव्यञ्जयन्तीं नन्दिनीं च ददर्श॥

**तं विस्मितं धेनुरुवाच साधो मायां मयोद्भाव्य परीक्षितोऽसि।**
**ऋषिप्रभावान्मयि नान्तकोऽपि प्रभुः प्रहर्तुं किमुतान्याहिंस्राः॥ ६२**

विस्मितं इयन्तं कालमत्र स्थितः सिंहः क्व यातः? "उत्तिष्ठ

वत्स" इतीयं सुमधुरा वाक् केनोदीरिता ? इत्यनवगमेन आश्चर्यभाजं, तं दिलीपमहाराजं, धेनुः मातृवत् अग्रतः स्थिता नन्दिनी, उवाच अब्रवीत्। हे साधो आर्जवैकनिधे, परमधार्मिक दिलीप, मया अद्भुतशक्तिमत्या, मायाँ अविद्यमानानामपि वस्तूनां विद्यमानवदवभासात्मकं अद्भुतवृत्तं, उद्भाव्य कल्पयित्वा, उत्पाद्य, परीक्षितोऽसि कृतपरीक्षो भवसि। परीक्षा नाम परकीयचितवृत्तेः गुणस्य ज्ञानस्य वा याथार्थ्योपलम्भार्थो व्यापारः। स इदानीं दिलीपविषये नन्दिन्या कृतः। अत आह नन्दिनी "परीक्षितोऽसि" इति।

मायैव। न तु वस्तुतः सिंहः कश्चिदागत्य ताँ आक्रम्य जिघांसति स्म, इत्येतद् दृढीकर्तुं स्वकीयं प्रभावविशेषमाह–ऋषीति। ऋषेः वसिष्ठमहर्षेः प्रभावात् महिमातिशयात्, अन्तकोऽपि साक्षाद् यमोऽपि, मयि पशुरूपायामपि मयि, प्रहर्तुं प्रहारान् दातुं, माँ हन्तुमिति यावत्; न प्रभुः न समर्थः। अन्यहिंस्राः इतरे घातुकाः प्राणिनः, किमुत मयि प्रहर्तुं न प्रभव इति किं वक्तव्यम्। ऋषिप्रभावादिति विनयोक्तिः।

उत्तिष्ठ वत्सेति वाचं निशम्य उत्थितोऽपि दिलीपः विस्मयवशेन किमपि अभाषमाणः तूष्णीमतिष्ठत्। तं 'साधो' इति प्रेम्णा सम्बोध्य धेनुरुवाच। "सिंहः तेन मम आस्कन्दनं तेन मम आर्तिः, आक्रन्दितं इति सर्वमिदं मया शक्तिविशेषशालिन्या कल्पितं केवलमायामयम्। वस्तुतोऽत्र सिंहो नागतः। न मामाचस्कन्द। न माँ पीडयति स्म। न मे अल्पिष्ठाऽपि व्यथा। अतो मम पीडा समजनीति मतिं मा स्म करोः। मा च मनागपि विषण्णो भूः। किमर्थमेवं मायोद्भावनमिति चेत् तव परीक्षणायेति॥

# श्रीभद्राद्रिरामसुप्रभातम् (अनुवृत्तम्)

## (श्रीभाष्यं - विजयसारथिः)

रूपं पयोमुचि दृशं रुचिरारविन्दे तेजो रवौ भवत आननमिन्दुबिंबे।
दृष्ट्वा विनोदयति तत् स्वयमेवमात्मा भद्राद्रिराम –

सत्यं शिवं मह इदं रुचिरं स्वरूपं विज्ञाय सम्यगुपयन्त्यमृतत्वमार्याः।
पश्यन्ति नैव कुधियो निपतन्ति कूपे भद्राद्रिराम –

स्वामिन्ननेकजनितो भववासनाऽसौ आविश्य, मां न विजहात्यपि-
त्वामेव, माधव दयस्व मयि प्रपन्ने भद्राद्रिराम – [चिन्तयन्तम्।

आशामरुस्थलमरीचिकयाऽवकृष्टं निस्सारसंसृतिमरुं परितो
दीन नयैनमचिरादमृतप्रवाहं भद्राद्रिराम – [भ्रमन्तम्।

कोऽहं कुतः समभवं कुत आगतोऽहं किंकार्यमस्ति मम किन्नु मदीय-
आलोचयन्तमपि किञ्चन भाति नो माँ भद्राद्रिराम – [मस्ति।

दुष्टा इमा विषम भौतिकवासना माँ विभ्रामयन्ति परितो हरितो,
मानं प्रमत्तमवशं दययाऽव देव भद्राद्रिराम – [हरन्ति।

अश्नामि तत्तदखिलं भवतैव दत्त, त्वद्दत्तमेव न हि दातुमुरीकरो-
विश्वासघातुकमिदं हृदयं कृतघ्नं भद्राद्रिराम – [ति।

अन्तर्बहिः सकलवस्तुषु सञ्चरन्तमन्तः प्रविश्य विदुषाँ मतिमीर-
अन्ता रमारतमयेय कदा भवन्त भद्राद्रिराम – [यन्तम्।

त्वद्दत्तमेव सकलं मदूपार्जितं हीत्यौद्धत्यमावहति पामर एष मूढः।
कस्मादुपागमदियं ममता न जाने भद्राद्रिराम –

पश्यन्तमप्यहरहः पुनरेव माँ त्वाँ नैवेक्षते बत जगन्मयमेष मूढः।
ज्योतिर्मयीं वितर मे दृशमात्मनीनाँ भद्राद्रिराम –

मन्दारसौरभभृतं मकरन्दपूर्णं हय्यङ्गवीनसदृशं घनसारशीतम्।
चेतो मदीयमुपदीकृतवानहं ते भद्राद्रिराम –

# कविसमयाः कवीनामक्षयपात्रम्।

उडुपि वेङ्कटकृष्णरायः

काव्ये लक्षणाव्यञ्जनावृत्त्या सूचिता अर्थाः कविसमयानुगृहीता इत्यस्माभिर्वक्तुं पार्यते। यथा चैते कविसमयाः कवीनामक्षयपात्रमिवोपकुर्वन्ति तथा दिङ्मात्रं प्रदर्शयितुमिदानीं प्रयतिष्यामहे।

सौभाग्यमिति शब्दं परिशीलयामः। यौगिकार्थं सुभगस्य भावं सर्वथा विहाय कालिदासेन 'प्रियेषु सौभाग्यफला हि चारुता'ति प्रयुक्तं पश्यामः। अस्य च शब्दस्य सम्यक् अर्थं ज्ञातुं पाश्चात्याः न कथमपि पारयेयुः किल। तेषाँ समाजे पुनर्विवाहप्रथाया रूढमूलत्वात् सुमङ्गली, सीमन्तिनीत्यादिशब्दानां अर्थाऽवधारणं, तैर्मनसाप्याकलनं, दुःशकमेव। अस्मासु पुनः विवाहे आमरणं संस्कारजन्यः सम्बन्धो नोच्छेद्यः। तथा च एकतरस्य मरणेऽन्यतरा मरणपर्यन्तं भर्तुरेव हितं प्रार्थयन्ती दिनानि यापयन्ति। अथवा भर्त्रा साकं चितारोहणं कर्तुमपि पतिव्रता उत्सहन्ते स्म। अस्य सौभाग्यस्य माहात्म्यं कविसमयानुगृहीतं पतिव्रताशिरोमणिभिरेवाकलयितुं शक्यम्। शंकरभगवत्पादा भङ्ग्यन्तरेणेदं स्वोपज्ञसौन्दर्यलहर्यां वर्णयन्ति –

करालं यत्क्ष्वेलं कबलितवतः कालकलना
न जाता शम्भोस्तज्जननि तव ताटङ्कमहिमा।

ताटङ्कः कीदृशं आभरणं आसीदिति अस्माभिरधुनातिकालिमाहात्म्येन ऊहितुं न शक्यते। तथापि सौभाग्यद्योतकमाभरणं सुमङ्गलीभिः कर्णे पिनद्धमासीदिति ज्ञातुं प्रभवामः। कविकुलगुरुश्च 'सौभाग्यं ते विरहविधुरावस्थया व्यञ्जयन्ती'त्यापिषु नैकविधेषु मेघ

दूते, अन्यत्रापि काव्यनाटकादिषु पदमिदं प्रयुज्यैव आत्मोपज्ञातासु सर्वास्वपि नायिकासु परां काष्ठाँ प्राप्तवान् इत्यप्यस्मानुपदिशतीव । आत्मनोऽपि गृहीण्या ईदृशं सुखदुःखाद्वैतवत्त्वं सूचयति ।

सौभाग्यपदस्य माहात्म्यमन्यत्रापि सौन्दर्यलहर्यां भगवत्पादाः सूचयन्ति । यथा –

**कलत्रं वैधात्रं कति कति भजन्ते न कवयः**
**श्रियो देव्याः को वा न भवति कैश्चिदपि धनैः (?)।**
**महादेवं हित्वा तव सति सतीनामचरमे**
**कुचाभ्यामासङ्गः कुरबकदलस्याप्यसुलभः ॥**

कालिदासेन कुमारसंभवे वर्णितामेव रीतिमनुसरन्त इव भगवत्पादाः कविता सौभाग्यस्यापि परां काष्ठामधिरूढा इति मम प्रतिभाति ।

यदा च कालिदासः "गौरीवक्त्रभ्रुकुटिरचनां या विहस्येव फेनैः । शंभोः केशग्रहणमकरोदिन्दुलग्नोर्मिहस्ता' इति गंगायाश्चित्रमस्माकं मनसः पुरत उपस्थापयति तदा कविसमयान् किञ्चिदिवावगन्तुं प्रभवामः । एकपत्नीव्रतं धारयतोऽपि शिवस्य भार्याद्वयं कविसमयानुग्रहेणैव सिध्यति । इयं च गङ्गा भार्याद्वयवतो यवीयसी भार्येव ईश्वरस्य शिरः समाक्रम्याधितिष्ठन्ति । फेनमिदं कविसमयानुगृहीतया रीत्या धवलवर्णविशिष्टं हास इत्युत्प्रेक्ष्यते । अस्याश्च गङ्गाया हस्तौ कवेर्मनस्यूर्मित्वं संप्राप्य केशग्रहणाय पुनः प्रसृतौ भवत इत्यप्युत्प्रेक्षा कविपरंपरानुप्राणितेत्यपि सुधीभिराकलयितुं पार्यते । यदा च कालिदासो गङ्गातीरसैकतेषु चन्द्रिकाया आमोदमुपभुंजान उपाविशत् तदा तस्य मनसीत्थमुत्प्रेक्षा सञ्जाता स्यात् ।

# सुभाषितम् ।

१ विनाशयन् विग्रहजालमेवं जनस्य सर्वस्य च भूतलेऽस्मिन् ।
मीमाँसकोऽयं मशको नवीनः श्रुतिं स्वशब्दैरसुरवाकरोति ॥

२ मनोभवः कोपि सहोद्भवस्ते रमे तमेनं शिरसा दधाति ।
मनोभवः कोपि तनूभवस्ते भवस्तु त भस्म कुतो वितेने ॥

३ मनोभवं कंचन माधवस्य महेश्वरोऽयं मकुटे विधत्ते ।
मनोभवं कंचन मर्दयित्वा मनोहरं मण्डनमङ्गकेषु ॥

आशुकविसार्वभौम श्रीनिवासराघवाचार्यः

१ क्षौद्रं सुधासहचरं सुमनः प्रसूत-
मादाय पातु तृषितः सकल यथेच्छम् ।
क्षुद्राकुलालयमयं विटप च हन्तो-
त्येतत्कृतघ्नचरित मननक्षम किम् ॥

२ मोचाकाण्ड निकृत्तभुक्तफल हे मा गा विषादं भव-
न्मूलान्नूनमुदेति बालकदलीरोह कुलस्याङ्कुरः ।
पत्रं तन्तुरतीव हृद्यमसृणो दण्डः फल चापि ते
लोकं प्रीणयतीत्यहो मधुरिमा सर्वोत्तरस्तावकः ।

३ भुवः सारं भुङ्क्षे धरसि हरितं छत्रमधिका
त्वयि न्यस्ता सेवा सुजननिवहैः प्रीतिविवशैः ।
शरण्यो रुग्णानाँ मसृणमधुरोऽदन्तसुहृदाँ
गुणैः ख्यातो राजा भवसि भुवने सूरण सखे ॥

[सूरणः चेनै करणिक्कलङ्गु । रोगिणां पथ्य आहारः ।
दन्तविहीनानाँ सुखेन आस्वाद्यः]

ए.बि. कृष्ण वारियर्

# ईश्वरः कर्षकश्च

## एकाङ्कं नाटकम्

(शिरोमणि ए. वि. कृष्णवारियर्)

[सूर्यः अह्नो मध्यमलङ्करोति। कस्मिन्नपि खलाङ्गणस्य कोणे महान् धान्यराशिः। अन्यत्र तृणपुञ्जः। अन्यत्र तुषस्तोमः। महति गोष्ठे उक्षाणः धेनवः महिषाः लाङ्गलादि कृषिकर्मणः उपकरणजातम्। खलस्य पृष्ठप्रदेशे लूनानि धान्यानि पुनन्ति कर्मकराः। कर्षकः अङ्गणमध्ये तिष्ठति। यवनिकायां उत्क्षिप्तायां उज्ज्वलवेषः ईश्वरः प्रविशति]

ईश्वरः— (उपसृत्य) कर्षक, प्रसन्नोऽस्मि ते तपसा। नेत्रे निमीलय। (हस्तं गृह्णाति)

कर्षकः— (नेत्रे निमील्य अञ्जलिं बध्नन्) भगवन्, अनुगृहीतोऽस्मि (प्रणमति)

ई— किं मोक्षमिच्छसि ?।

क— न। न। मोक्षं नेच्छामि।

ई— किं स्वर्गम् ?।

क— नतरां स्वर्गम्।

ई— तर्हि किमिच्छसि ? वद।

क— प्रभो, प्रसन्नो भगवान ममाभिलाषमिमं पूरयतु।

ई— पूरयामि। उच्यतामभिलाषः।

क— महान् परितोषः। एतावदेव प्रार्थ्यते। मम प्रयत्नस्य फलमन्यो माऽपहरतु।

ई— तथा भवतु। कर्षक, भवन्तं किञ्चित् पृच्छामि। न्यायोऽयं सामान्यः खलु।

क— कः सन्देहः। सामान्य एव। एकस्य प्रयत्नफलमन्यो मा हरतु।

ई— कर्षक, तव प्रयत्नफलं कोऽपहरति।

क— क्षेत्रस्य स्वामी।

## सुभाषितम्।

१ विनाशयन् विग्रहजालमेवं जनस्य सर्वस्य च भूतलेऽस्मिन्।
मीमाँसकोऽयं मशको नवीनः श्रुतिं स्वशब्दैरसुरवाकरोति॥

२ मनोभवः कोपि सहोद्भवस्ते रमे तमेनं शिरसा दधाति।
मनोभवः कोपि तनूभवस्ते भवस्तु त भस्म कुतो वितेने॥

३ मनोभवं कंचन माधवस्य महेश्वरोऽयं मकुटे विधत्ते।
मनोभवं कंचन मर्दयित्वा मनोहरं मण्डनमङ्गकेषु॥

आशुकविसार्वभौम श्रीनिवासराघवाचार्यः

१ क्षौद्रं सुधासहचरं सुमनः प्रसूत-
मादाय पातु तृषितः सकल यथेच्छम्।
क्षुद्राकुलालयमयं विटपं च हन्तो-
त्येतत्कृतघ्नचरित मननक्षम किम्॥

२ मोचाकाण्ड निकृत्तभुक्तफल हे मा गा विषादं भव-
न्मूलान्नूनमुदेति बालकदलीरोह कुलस्याङ्कुरः।
पत्रं तन्तुरतीव हृद्यमसृणो दण्डः फल चापि ते
लोकं प्रीणयतीत्यहो मधुरिमा सर्वोत्तरस्तावकः।

३ भुवः सारं भुङ्क्षे धरसि हरितं छत्रमधिका
त्वयि न्यस्ता सेवा सुजननिवहैः प्रीतिविवशैः।
शरण्यो रुग्णानाँ मसृणमधुरोऽदन्तसुहृदाँ
गुणैः रव्यातो राजा भवसि भुवने सूरण सखे॥

[सूरणः चेनै करणिक्कलङ्गु। रोगिणां पथ्य आहारः। दन्तविहीनानाँ सुखेन आस्वाद्यः]

ए. ब्रि. कृष्ण वारियर्

# ईश्वरः कर्षकश्च

## एकाङ्कं नाटकम्

(शिरोमणि ए वि कृष्णवारियर्)

[सूर्यः अह्नो मध्यमलङ्करोति। कस्मिन्नपि खलाङ्गणस्य कोणे महान् धान्यराशिः। अन्यत्र तृणपुञ्जः। अन्यत्र तृणस्तोमः। महति गोष्ठे उक्षाणः धेनवः महिषाः लाङ्गलादि कृषिकर्मणः उपकरणजातम्। खलस्य पृष्ठप्रदेशे लूनानि धान्यानि पुनन्ति कर्मकराः। कर्षकः अङ्गणमध्ये तिष्ठति। यवनिकायां उत्क्षिप्तायाँ उज्ज्वलवेषः ईश्वरः प्रविशति]

ईश्वरः— (उपसृत्य) कर्षक, प्रसन्नोऽस्मि ते तपसा। नेत्रे निमीलय। (हस्तं गृह्णाति)

कर्षकः— (नेत्रे निमील्य अञ्जलिं बध्नन्) भगवन्, अनुगृहीतोऽस्मि (प्रणमति)

ई— किं मोक्षमिच्छसि ?।

क— न। न। मोक्षं नेच्छामि।

ई— किं स्वर्गम् ?।

क— नतराँ स्वर्गम्।

ई— तर्हि किमिच्छसि ? वद।

क— प्रभो, प्रसन्नो भगवान् ममाभिलाषमिमं पूरयतु।

ई— पूरयामि। उच्यतामभिलाषः।

क— महान् परितोषः। एतावदेव प्रार्थ्यते। मम प्रयत्नस्य फलमन्यो माऽपहरतु।

ई— तथा भवतु। कर्षक, भवन्तं किञ्चित् पृच्छामि। न्यायोऽयं सामान्यः खलु।

क— कः सन्देहः। सामान्य एव। एकस्य प्रयत्नफलमन्यो मा हरतु।

ई— कर्षक, तव प्रयत्नफलं कोऽपहरति।

क— क्षेत्रस्य स्वामी।

ई— स यत्नं कमपि न करोति ।

क— कञ्चिदपि न करोति । प्रासादे सुखं निद्राति । मम प्रयत्नस्य फलं हरति च ।

ई— किं सत्यमेतत् ?

क— सत्यमेव । कथमसत्यं निवेद्यते ?

ई— भवतु । कः कृषिकर्माणि करोति ?

क— अहमेव करोमि ।

ई— भवानेकः । बहूनि च कृषिकर्माणि । कथं भवानेकाकी करोति ?

क— प्रभो, निरन्तरं दिवानक्तं च महता प्रयासेन करोमि ।

ई— विशालस्य क्षेत्रस्य खननम् । जलसेचनम् । दोहदप्रदानम् । उत्खननम् । प्रतिरोपणम् । रक्षणम् । लवनादिकञ्च कर्तुं शक्तिरेकस्य विद्यते किं ?

क— नास्ति, भगवन् । कानिचिदहं करोमि । अन्यानि भृत्यैः कारयामि च ।

ई— उपपन्नम् । कर्षक, न केवलं भवतः किन्तु भृत्यानां प्रयत्नेन च जातानि कृषिफलानि । न किम् ?

क— सत्यं सत्यं, तथैव ।

ई— भृत्यानां प्रयत्नस्य फलं भवान् नापहरतीति मन्ये ।

क— न भगवन्, नापहरामि । प्रतिदिनं भृत्येभ्यः समुचितं वेतनं मया दीयते । (नैपथ्ये असत्यमिदमसत्यमिदम्)

ई— (कर्णं दत्वा) के वदन्त्येवं कर्षक ?

क— (परितः अवलोक्य) मम भृत्याः । (ऊरुमात्रं मलिनवस्त्रं वसानाः मार्जनीशूर्पादिकं करेण वहन्तः, चीरखण्डेन प्रावृतकेशाः भृत्याः प्रविशन्ति ।)

भृत्याः— असत्यमिदं कर्षकस्य वचनं, असत्यं भगवन् (प्रणमन्ति)

ई— श्रेयांसि भूयाँसि भवन्तु (दक्षिणं हस्तं उद्यम्य) भद्राः, किं वेतनं न दीयते।

भृ— दीयते। परन्तु प्रयत्नस्य समुचितं न।

ई— कर्षक, उत्तरं दीयताम्।

क— (भृत्यान् पश्यन्) किं समुचितं वेतनं न दीयते।

भृ— न दीयते। भगवन्, अयं कर्षकः अस्माकं प्रयत्नस्य भूयांसं भागमपहरति। केवलमत्यल्पोऽस्मभ्यं दीयते।

क— कथमेवमसत्यं कथ्यते ?

भृ— अत्र असत्यस्य लेशोऽपि न। श्रूयताम्। उदिते सूर्ये वयं सर्वे क्षेत्रं प्रविश्य प्रयतामहे। अस्तमिते कुटीरं गच्छामः।

ई— कर्षक, किमेतत्सत्यम् ?

क— सत्यमेव।

भृ— भगवन्, अस्माकं प्रयत्नेन क्षेत्रं प्रभूतं फलति।

ई— कर्षक, एतदपि सत्यं किम् ?

क— सत्यमेव।

ई— कर्षक, प्रयत्नस्य फलं समं विभज्य न गृह्णीथ किम् ? किं जोषमास्यते उच्यताम्।

[नेपथ्ये वृषभः नदति]

ई— वृषभस्येव शब्दः।

भृ— तथैव। वृषभोऽयमुच्चैर्नदन् इत एवागच्छति।

[गोमयेन समालिप्तः कृशः क्षरद्रक्तैः व्रणैः दुर्निरीक्षः वृद्धः स्फुटोपलक्ष्यमाणास्थिकलापः वृषभः प्रविशति]

वृ— भगवन्, अयं प्रणामः।

ई— वृषभराज, स्वागतं ते। किमर्थमागमनम् ?

वृ— प्रसीदतु भवान्। अयं कर्षकः मम प्रयत्नस्य सर्वं फलमपहरति।

969

ई— स्पष्टमुच्यतां वृषभराज, अलं भयेन।

वृ— भगवन्, श्रूयताम्। मम वंश्यानां साहाय्यं विना भारते वर्षे प्रायेण कर्षणं कर्तुं कर्षकः न शक्नोति। अहं महति पङ्के मग्नः भूमिं कर्षामि। पश्यतु भवान् मम स्कन्धम्। (दर्शयति)

ई— (पश्यन्) कर्षक स्कन्धे किणः कथं जातः ?

क— हलस्य वहनेन।

वृ— भगवन् न केवलं स्कन्धे किणः, शरीरं सर्वं पश्यतु भवान्।

ई— (पश्यन्) एते व्रणाः। ततः रक्तं स्रवति। कृमयोऽपि रक्ते। कष्टं कष्टम्। कर्षक, ताडनेन किं व्रणाः जाताः। किं तूष्णीकोऽसि! किं ताडनेन ?

क— सत्यं तथैव।

ई— अहो कष्टम्। कर्षक, वृषभराजः महदुपकरोति। भवान् किमर्थं ताडयति ?

वृ— भगवन् अहं निरन्तरं बलवत् प्रयते। तथापि कर्षकः शाल्यन्नं भक्षयति प्रभूतम्। मह्यं तु अल्पं तृणं दीयते। कर्षकः सुन्दरे सौधे वसति। अहं तु मलिनतमे गोष्ठे। किं बहुना कृषिकर्मणा वृद्धभावमुपगतं मां निहत्यायमन्ते भक्षयिष्यति च।

ई— (कर्णौ पिधाय) शान्तं पापम्। वृषभराज, अतः परं श्रोतुं न मे शक्तिः। कर्षक, वृषभराजस्य वचनं किं श्रुतम्!। मौनं किम्? भवान् मातामहतुल्यं वृषभं भक्षयिष्यति किम्?

क— नाहं तथा करिष्यामि। (नैरथ्ये) असत्यमिदमसत्यमिदम्।

ई— कोऽयं तृतीयो वदति ?

भृ— अयं वृक्षः इत एव आगच्छति।

[पर्णैः कुसुमैः शाखाभिश्च वियोजितः वृक्णत्वक् वृक्षः प्रविशति]

वृक्षः— भगवन्, अयं प्रणामः।

## उपकारिणो विद्वांसः


श्री कारप्पङ्गाडु वेङ्कटाचार्यः
श्री व. न. श्रीरामदेशिकाचार्यः
श्री उडालि सुब्बरामशास्त्रिप्रधानाः
श्री ए. राधाकृष्णमूर्तिः

श्री चिल्लकूर् वेङ्कटाचार्यः
श्री व. कृ. शेषाद्र्याचार्यः
नेल्लूर् वेदसंस्कृतपाठशाला-
[ध्यापकाः

## Editorial Board Members

Sri Vidyalankara V. R. SRINIVASA TATACHARYA,
Vyakarana, Sahitya, Visishtadwaita Siromani.
„ D. T. TATACHARYA, Siromani, M. O. L.,
„ V. S. V. PATRACHARYA, Siromani.

अस्मत्प्रतिनिधी—

**Sri V. S. Ranganathan**, M. A., B. O. L.,
त्रिदण्डिमठ - दारागञ्ज्, ALLAHABAD.

„ **D. Srinivasacharya**, Siromani,
17/7, Sadam Wadi, Bhandup, Bombay-78



Editor & Publisher :

**D. T. Tatacharya**, Siromani, M.O.L.,
113, G. South Mada Street, Tirupati. (A.P.)

अहोबिलमठ श्री सन्निधिः ।
वानमामलैमठ श्रीस्वामिचरणाः ।
श्रीमत् आण्डवन् सन्निधिः ।
परकालमठ श्रीसन्निधिः ।

,, Raja Bahadur S. Aravamudu Iyengar, B. A., B. L. M. B. E.
,, Justice S. Varadachariyar, B. A., B. L.,
,, A. Srinivasa Iyengar, Mannargudi.
,, R. Gopalaswami Iyengar, Advocate, Madras.
,, K. Srinivasa Iyengar, Madurai.
,, J. Subramaniam, Advocate, Gopichettipalayam.
,, S. T. G. Varadacharyulu, Chittigudur.
,, M. Sankar Lal, Tirupati.
,, N. S. Chari, Bombay.
,, Seth Govind Babu Bangur, Calcutta.
,, T. V. Visvanatha Aiyer, Mylapore, Madras.
,, N R. Srinivasa Iyangar, Madras.
,, K. Venkatachari, Bombay.

---

To

Sri ______________________

______________________

______________________

---

Pri...

... Radhakrishnan,

... Pre..., Tirupati.

R. K...

REGISTERED NO. H. 569

श्रीः

Book III No. 8

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

(अभिनवमाला)

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनि सद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ।

पु. ३] कलि ५०६९–प्लवङ्ग–वृश्चिकः [सं. ८

# THE UDYANA PATRIKA

A SANSKRIT MONTHLY

NEW SERIES.

NOVEMBER - 1967

**अकार्यचिन्तासमकालमेव**
**प्रादुर्भवन् चापधरः पुरस्तात्**
**अन्तःशरीरेष्वपि यः प्रजानां**
**प्रत्यादिदेशाविनयं विनेता ॥**

कविचक्रवर्ती कालिदासः कार्तवीर्यार्जुनं एवं वर्णयति ।

In case the previous issue is not received please inform the editor immediately.

Annual Subscription Rs. 3/— Foreign 12/—Rs.

# UDYANA PATRIKA

## उद्यानपत्रिका

१ अस्या वार्षिकं मूल्यं त्रीणि रूप्याणि ।

२ ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।

३ एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिक-तर आदरः ।

४ प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः ।

५ एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः सम्पादकेन साकं कर्तव्याः । (संस्कृतेन आङ्गल्या द्राविडचा वा न तु भाषान्तरेण ।)

६ लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।


सम्पादकः; प्रकाशकश्च—

Mimamsarnava, Mimamsakesari, Panditaraja

**D.T. TATACHARYA SIROMANI,** M.O.L.

TIRUPATI.


---

## विषयाः


१. भाषाविप्रतिपत्तिः ।

२. श्री भद्राद्रिरामसुप्रभातम् ।

३. भक्तिसारः ।

४. रघुवंशः ।

५. सहधर्मचारिणी उत समधर्मचारिणी ।

६. कविसमयाः ।

७. ईश्वरः - कर्षकश्च ।

८. अभयप्रदानसारः ।

# उद्यानपत्रिका ।

अन्या वाचो विमुञ्चथ ।

(अभिनवमाला)

वेदापहारविक्रोशद्वेधःखेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पुस्तकं ३] कलि ५०६९ – प्लवङ्ग – वृश्चिकः [सं. ८

NOVEMBER - 1967


## भाषाविप्रतिपत्तिः

कलाशालासु माणवकैः का का भाषा अभ्यसनीयेति, अस्मद्देशस्य अखण्डस्य राष्ट्रभाषा का भवितुमर्हतीति च महान् सम्प्रति विवादः सर्वत्र प्रवर्तते। तथा महान् यथा रागद्वेषौ अभिवृद्धौ मिथः केशाकेशि मुष्टीमुष्टि करणे जनान् प्रवर्तयतः। आङ्गलीपक्षपातिनः, हिन्दीपक्षपातिनः, स्वस्वप्रदेश भाषापक्षपातिनः, संस्कृतपक्षपातिन इति तीव्रवादिनाँ नानात्वात् अनर्थकारिण्याः विप्रतिपत्तेः न परं शान्तिर्नाभूत्, न भवति च किन्तु उत्तरोत्तरं सा दृढा दृढतरा, दृढतमा जायते।

अद्य सागरमन्त्रिशाखासम्बन्धी श्रीमान् डा. रामजी उपाध्यायः एम्.ए., डी.लिट्., "संस्कृतं भारतीयराष्ट्रियता च" इति कृतशीर्षकं स्वलिखितं मुद्रितं खण्डपत्रमेकं अस्यां पत्रिकायाँ प्रकाशनाय अस्मत्सकाशं प्रेषितवान्'। अत्र आङ्गल्या राष्ट्रभाषात्वानौचित्यनिरूपणं मुख्यं लक्ष्यम्। अस्य सारांशः अयम्। –

"भारतदेशस्य यदैक्यं तत्र आङ्गलभाषाप्रचारो न कारणम्।

उत्तरं यत् समुद्रस्य हिमाद्रेश्चैव दक्षिणम्।
वर्षं तद् भारतं नाम भारती यत्र सन्ततिः॥

इत्येवमुक्तत्वात् चिरात्पूर्वं इदमैक्यं सिद्धमित्येतत् असन्दिग्धम्। न च भूभागसन्निवेशविशेषमात्राधीनं इदमैक्यम्। अपि तु संस्कृति-

विशेषाधीनं यद् राष्ट्रैक्यं तदधीनं, तद्रूपं च। राष्ट्रैक्यहेतुभूतोऽयं संस्कृतिविशेषः संस्कृतमये तत्तत्प्रदेशभाषामये च ग्रन्थजाते निहितो वर्तते। आसाँ भाषाणामुपेक्षणे अयं संस्कृतिविशेष एव लुप्येत। किं बहुना। भारतस्य भारतत्वमपि अपेयात्। अतः संस्कृतस्य तदुपजीविनीनाँ अन्यासाँ भारतदेशीयभाषाणां च अध्ययनाध्यापनयोः व्यवस्था विशेषतः कार्या।

स्वकीयसंस्कृतेः अस्मिन् देशे प्रसरणाय विदेशीयाः बहूनि बहुविधानि प्रलोभनानि कुर्वन्ति। तैः आकृष्टा वयं यदि स्वकीया भाषाः परित्यज्य आङ्गलीभक्ता भवेम तर्हि भारतीया न भारतीया भवेयुः अपि तु अन्य एव।" इति।

अस्माकमयमभिप्रायः। यथा मिथः कलहो भवति, वैमनस्यमभिवर्धते, असङ्गाते पर्यवसानं भवति, तथा यस्मिन् कस्मिन्नपि विषये अभिनिवेशो न कर्तव्यः, न प्रकाशनीयः। यदि न सम्प्रतिपत्तिः तर्हि वर्तमाना स्थितिरनुवर्तताम्। कालक्रमेण तद् व्यक्तीभविष्यति यत् न्याय्यं सर्वानुकूलं च। परं तु ययाकयाचिदपि भाषया अस्मत्संस्कृतिः, अस्मदीयधर्मसरणिः, अस्मदीया जीवनपद्धतिः, सर्वावगता कर्तव्या, न परं अस्मद्देशीयैः अपि तु देशान्तरीयैरपि यथा अवगता भवेत् तथा बोधनीया, तथा प्रख्यापनीयेति।

## श्रीभद्राद्रिरामसुप्रभातम् (अनुवृत्तम्)

(श्रीभाष्यं - विजयसारथिः)

**अल्पं त्वधीतमथ भावितमल्पमेव तत्राल्पमाचरितमप्यहमेष सर्वम्।**
**वेद्मीति भावयति माद्यति चायमात्मा भद्राद्रिराम -**

**ज्येष्ठा पिशाचमहिषी हृदयाधिराज्यमाक्रम्य भाषयति माँ परुषाक्षराणि।**
**पापे प्रवर्तयति पीडयते यथेच्छं भद्राद्रिराम -**

तत्तद्रसोचितकथोचितपात्रजातमाकल्प्य जागतिकनाटकमावरेण।
लोकेश नाटयसि जीवनटव्रजेन भद्राद्रिराम –
विश्वं यदि त्वमसि तर्हि कुतो हि न स्युस्तत्तद्विकारविदशा ननु
चित्रं हृच्ययोमयमिद प्रतिभाति मे तत् भद्राद्रिराम – [ को नु भुङ्क्ते।
तं तं पदार्थमभिविश्य विराजसे त्व स्पर्शोऽपि तस्य न खलु प्रति
चित्रं चरित्रमयि वर्णयितु क ईष्टे भद्राद्रिराम – [ भासि न स्त्वम्।
सङ्कर्षणादिभिरनेकविधावतारैर्लीलाविभूतिमपि नित्यविभूतिमेवम्।
आस्थाय मोदयसि देव यथाभिलाषं भद्राद्रिराम –
ब्रह्मादयोऽपि भवदीयमहत्त्वतत्त्व जानन्ति नैव निगमा अपि नो
[ विदन्ति॥
भक्तावलेः सुलभतामुपयास्यथापि भद्राद्रिराम भगवन् तव सुप्रभातम्।

---

## भक्तिसारः

(तिरुमलिशै आल्वार्)

D.R.

"कणिकण्णो गच्छति। मरकतमगुराङ्ग, भगवन् रमणीय-काञ्चीनगरनाथ, न त्वयाऽत्र स्थातव्यम्। अहं च, धीरः त्रिशुद्ध-वाक् कविः, प्रस्थितोऽस्मि। वेष्टय सर्पशय्याम्"। इत्थमुवाच कश्चन योगी 'वे:का' इत्याख्याते आलये विराजमानस्य वेगासेतु-रिति प्रथितस्य भगवतः पुरस्तात्। भगवानपि उत्थितः, नगराद् बहिः गच्छन्तं योगिनमनुगच्छंश्च तस्य विधेयो बभूव, यथोक्त-मकरोत्। एकदिनापगमे तस्यैव योगिनो निदेशेन तमालयं प्रति न्यवर्तत, अशेत च पुरेव सर्पशयनमास्तीर्य। परन्तु वामं भुजमुप-धानीचकार, न तु पूर्ववद् दक्षिणम्। अयं योगी भक्तिसारः। एवं अस्य योगिनः निदेशमनुसृत्य प्रवृत्तिकरणात् भगवतः 'यथोक्त-कारी' इति नामधेयमभूत्। "भगवान् भक्तिमतां यथोक्तकारी" इति श्रीदेशिकः। ये भक्तिमन्तः तेषां यथोक्तकारी भगवानिति देशिक इह स्फुटीकरोति।

अयं भक्तिसारः मदरासस्य (मेड्रास्) पश्चिमायाँ दिशि षोडशशिलादूरे "तिरुमलिशै" – श्रीमहीसार–नाम्नि ग्रामे मघानक्षत्रे अजायत। महीसारपदं द्राविडयां 'मलिशै', इति परिणामं भेजे। 'तिरु' इत्ययं 'श्री' इत्यस्य परिणामः पूज्यताव्यञ्जकः। यथा प्रथमे त्रयो भक्ताः तथा अयमप्ययोनिज इति वदन्ति। तेषु वृद्धेषु अयं बालः तत्समकालिकः। यथा अन्ये भक्ताः तथा अयमपि अनेकक्षेत्रवासिनो भगवतः गाथाभिः अगायत्। अस्य विषये केवलं अर्चामूर्तयः केचन भगवन्तः अर्चाभावविरुद्धं अनुग्रहातिशयं प्रकाशयन्ति स्म। एषु अनुग्रहेषु एकः यथोक्तकारिणा भगवता कृतः पूर्वमुक्तः।

अन्यावपि द्वौ स्तः, यौ एतदीयभगवद्भक्तेः असाधारणं वैलक्षण्यं ज्ञापयतः। अनया विलक्षणया भक्त्यैव अयं भक्तिसार इति प्रथाँ लेभे। श्रीमति कुम्भघोणे शयनावस्थं भगवन्तं सेवमानोऽयं उद्रिक्तचित्तवृत्तिः सन् शयनकारणं पप्रच्छ। –

"रामत्वे यत् सञ्चारमकरोः, तेन किं पादयोः रुजा अजनि? वराहो भूत्वा भूमिं यत् उद्धृतवान् तेन किं शरीरं कम्पितम्? किं कारणं यत् शेषे अस्मिन् कुम्भघोणे विशालायाः, मार्गेस्थितान् पर्वतकान् वनानि च अतीत्य प्रवहन्त्याः कावेर्यास्तीरे? उत्तिष्ठ। देहि प्रतिवचनम्" इति।

रमणीयया गाथया एवं सविनयं प्रार्थनायां कृतायाँ अयं भगवान् – अपर्याप्तामृतनामा – शिर उन्नमय्य सर्पशयनात् उत्थातुमारभत। अनेन अनुग्रहेण अतिमात्रं आवर्जितः भक्तिसारः सपदि जगौ – "विजयस्व भगवन् सुकेश"। विना उत्थानपरिश्रमं यथापूर्वं अवतिष्ठताँ भगवान्, इत्यभिप्रायः। तस्मिन् क्षणे यथा बभूव तथैव भगवान् अवतस्थे। अद्यापि स भगवान् उत्था(त्ता)नशायी दर्शनं ददाति। (अनुवर्ति)

**भक्त्या गुरौ मय्यनुकम्पया च प्रीताऽस्मि ते पुत्र वरं वृणीष्व।
न केवलानां पयसां प्रसूतिमवेहि मां कामदुघां प्रसन्नाम्॥ ६३**

परीक्षा कृतेत्याह। किंविषया सा परीक्षेत्येतत् ज्ञापयन्ती महाराजे स्वस्य प्रसन्नतां प्रकटयन्ती च आह। हे पुत्र, वात्सल्यातिशयव्यञ्जकमिदं सम्बोधनम्। मातेति बुद्धिः नन्दिन्यां महाराजस्य। अतस्तदनुगुणं सा तं पुत्रत्वेन गृह्णाति। गुरौ वसिष्ठमहर्षौ, भक्त्या महनीयत्वबुद्धिपूर्वकप्रेमातिशयः भक्तिः, तया, मयि मद्विषये, अनुकम्पया दयया च, हेतौ तृतीया। ते तुभ्यं, त्वयीति यावत्, (अहं), प्रीता प्रीतिमती, प्रसन्ना, अस्य मनोरथः पूरणीय इत्यभिप्रायवती, अस्मि भवामि। वरं अभिमतं अर्थं, वृणीष्व प्रार्थयस्व, अयमिति निर्दिश। देवान् प्रार्थ्य लभ्योऽर्थो वरः। पशोः मत् वरलाभस्य कोऽवकाश इति न त्वया मतिः कार्येत्याह-नेति। मां कामधेनुपुत्रीं वसिष्ठमहर्षेर्धेनुं, केवलानां पयोव्यतिरिक्त-यत्किञ्चित्फलरहितानां, पयसां क्षीराणां, लोके विद्यमानाः अन्याः सर्वा गावः यानि ददति तेषां पयसामेवेति भावः। प्रसूतिं दात्रीं, नावेहि न जानीहि, न मन्यस्व। (किन्तु) प्रसन्नां मां, सम्यगाराधिता यदाऽहं प्रसादं करोमि तदेति भावः। कामदुघां आराधको यदपेक्षते तद्दानक्षमां, अवेहि। इतरासु सर्वासु गोषु असम्भाव्यविलक्षणशक्तिमतीं मां जानन् निश्शङ्कं वरं वृणीष्वेति भावः।

गुरौ मयि च भक्तिं प्रति परीक्षेति ज्ञापयति। सिंहेन केनचित् उत्पत्य आक्रान्तमिव तेन अत्यन्तं आर्तमिव आत्मानं प्रदर्श्य स्वरक्षणप्रवृत्तस्य बाहुप्रतिष्टम्भं कृत्वा, स्वं सिंहपारणार्थं

विमुच्य दिलीपेन स्वात्मरक्षणमेव न्याय्यमिति यद्द बहुधा प्रलोभनं चकार, सा परीक्षा। यदि तस्य गुरौ भक्तिः नन्दिन्यां अनुकम्पा च मन्दा अभविष्यत्, तर्हि तथेति प्रतिपद्य गाँ सिंहेन हन्यमानां अनुमत्य स्वयं सुखं निवृत्तौ मतिं अकरिष्यत्। तदा परीक्षायां भग्नोऽभविष्यच्च। यस्मात् तु स्वशरीरार्पणेनापि धेनुरक्षणे दृढमतिरभूत् तस्मात् गुरौ परमां भक्तिं धेन्वाँ परमाँ अनुकम्पां च आत्मीयां सम्यक् प्रकाशयामास। परीक्षायां उत्तीर्णोऽभवत्। तेन प्रीता धेनुः वरवरणाय तं चोदयामास।

पुत्रेति पृथक्पदं सम्बोधनमिति असन्दिग्धमेतत्। तथापि 'पुत्रवरं' इत्यव्यवधानेन प्रयोगात् पुत्ररूपं वरं वृणीष्वेति, महाराजः पुत्रार्थीति विदन्ती नन्दिनी एवमुवाचेति ध्वनिरभिमत इति भाति।

"प्रीता कामदुघा हि सा" इति पूर्वं ऋषिणा उक्तं इह नन्दिन्यैवोच्यत इति ज्ञेयम्॥

**ततः समानीय स मानितार्थी हस्तौ स्वहस्तार्जितवीरशब्दः।**
**वंशस्य कर्तारमनन्तकीर्तिं सुदक्षिणायां तनयं ययाचे॥ ६४**

ततः नन्दिन्या आदेशानन्तरं, मानितार्थी मानिताः पूजिताः अपेक्षितार्थवितरणेन सम्भाविताः अर्थिनः याचकाः येन सः, स्वस्य आत्मनः हस्ताभ्यां कराभ्याँ आर्जितः सम्पादितः वीर इति शब्दः येन सः, सः दिलीपमहाराजः, वंशस्य पुत्रः, तस्य पुत्रः, तस्य पुत्र इत्यविच्छिन्ना सन्ततिः वंशः, तस्य, कर्तारं प्रवर्तकं, कारणभूतं, अनन्ता देशतः कालतो वा अन्तरहिता अपरिच्छिन्ना कीर्तिः यशः यस्य तं, सर्वदेशसर्वकालव्यापिकीर्तिमन्तमित्यर्थः, सुदक्षिणायाँ यया सह सम्प्रति व्रतमनुतिष्ठति, तस्यामित्यर्थः। अस्यामुत्पद्यमानमिति यज्यम्। तनयं पुत्रं, ययाचे।

पूर्वं स मानितार्थी, याचकानां अभीप्सितार्थदाता आसीत्। न तु कदाचिदपि याचकः। पूर्वं शत्रुपराजयार्थवीरकर्मण्येव अस्य हस्तयोरुपयोगः, न तु कदाचिदपि याच्नाञ्जलिबन्धे। तथापि "आदेशं देशकालज्ञः" इति पूर्वोक्तरीत्या अद्य याचको बभूव, तदनुगुणं याच्नाञ्जलिं च बबन्ध।

वंशस्य कर्तारं तनयं ययाचे। अस्य पुत्रः पौत्रौ वा अन्यो वा तत्सन्ततौ पुनः पुत्रव्रतचर्यानिर्बन्धं यथा न प्राप्नुयात् तथा अविच्छिन्नसन्ततिहेतुं पुत्रं ययाचे। अनन्तकीर्तिं ययाचे। दशस्वपि दिक्षु विश्रान्ता शाश्वती कीर्तिः यथा जायेत तथा सकलसद्गुणसम्पन्नं ययाचे। ईदृशं पुत्रं तदा तेन सह व्रतमाचरन्त्यां सुदक्षिणायां उत्पद्यमानं ययाचे। वरं वृणीष्वेति एकस्यैव वरस्य वरणं नन्दिनी आदिशत्। धीमान् समर्थश्च दिलीपः पुत्रोत्पत्तिं, अनन्तकीर्तिनिर्देशेन तस्य बुद्धिमत्त्वविविधविद्यापारगत्व विनयदयादाक्षिण्यधार्मिकत्वशौर्यवीर्यादि सकलकल्याणगुणाढ्यत्वं, सुदक्षिणायाः तज्जननीत्वं च एकेन वरेण वव्रे ॥

**सन्तानकामय तथेति कामं राज्ञे प्रतिश्रुत्य पयस्विनी सा।**
**दुग्ध्वा पयः पत्रपुटे मदीयं पुत्रोपभुंक्ष्वेति तमादिदेश ॥ ६५**

पयस्विनी क्षीरप्रस्रववती, सा धेनुः, सन्तानकामाय सन्तानं कामयत इति, सन्ताने कामो यस्येति, सन्तानः कामः कामितोऽर्थो यस्येति वा सन्तानकामः, तस्मै. पुत्रमात्मनः इच्छते, राज्ञे दिलीपाय, तथा यथा त्वमिच्छसि तथा भविष्यति, त्वदिच्छानुसारेण सत्पुत्रस्ते सुदक्षिणायाँ नूनमुत्पत्स्यते, इति, प्रतिश्रुत्य प्रतिज्ञाय, हे पुत्र प्रियतम दिलीप, मदीयं पयः क्षीरं, पत्रपुटे वृक्षस्य कस्यचित् पर्णैः निर्मिते पात्रे, दुग्ध्वा प्रपूर्य, प्रपूरणं ऊधसः निःस्रावणम्। उपभुंक्ष्व पिब, इति, तं दिलीपं, आदिदेश आज्ञापयामास।

'तनयं ययाचे' इति पूर्वमुक्तत्वात् 'तथेति कामं राज्ञे प्रतिश्रुत्य' इत्येतावन्मात्रं अलम्। सन्तानकामायेत्यधिकम्, न वक्तव्यम्। न। महतः साम्राज्यस्य स्वकालानन्तरं अनाथत्वप्रसङ्गपरिहाराय युक्तमेष सन्तानं कामयत इति नन्दिन्यभिनन्दनप्रकाशकत्वेन अत्यन्तं अर्थवत्त्वात्। अतिप्रीत्या क्षणमात्रमपि विलम्बं विना सद्यो वरं ददाविति व्यञ्जनाय तथेति अतिसंक्षिप्तं उत्तरम्। अस्खलितेन भक्तिभरितेन च स्वकीयेन आराधनेन दिलीपः नन्दिनीं अतीव रञ्जयामासेति, तत् बुद्धौ कृत्वा धेनुर्वरं ददाविति च 'राज्ञे' इत्यनेन व्यज्यते। कामप्राप्तौ यथा तस्य दृढः प्रत्ययः स्यात्, मनागपि संशयो न स्यात्, तथा ऊर्जितं 'तथा' इत्युवाचेति ज्ञापनाय प्रतिश्रुत्येति, न तु दत्वा, पूरयित्वेत्यादि। वत्सं विना कथं दोहनमिति स मा शङ्क्ष्टेति स्वयं प्रस्रविणी बभूव। अत आह पयस्विनीति। दोहनपात्राभावशङ्कानिवृत्तये पत्रपुट इत्याहेति स्पष्टम्। आदिदेश न केवलमुवाच।

उपभुङ्क्ष्वेत्यत्र उपयुङ्क्ष्वेति पाठमुत्प्रेक्षन्ते। पयोभोजनयोः मिथः स्वरसान्वयविरहात्। उपसर्गबलेन उपभोगस्यैव प्रतीतेः उपभोगस्य च प्रीतिजनकव्यापारविशेषरूपतया उपयोग एव पर्यवसानात् स्थितः पाठो युक्त इति भाति॥

**वत्सस्य होमार्थविधेश्च शेषमृषेरनुज्ञामधिगम्य मातः।**
**औधस्यमिच्छामि तवोपभोक्तुं षष्ठांशमुर्व्या इव रक्षितायाः। ६६**

हे मातः जननि, वत्सस्य तर्णकस्य, होमार्थविधेः होमश्चासौ अर्थश्च होमार्थः होमरूपः प्रयोजनविशेषः तस्य यो विधिः अनुष्ठानं, निर्वर्तनं, तस्य, शेषं अवशिष्टं, वत्सपानानन्तरं यत् दुग्धं, तस्य होमे उपयोगानन्तरं यत् अवशिष्टं तदित्यर्थः। तव त्वदीयं, औधस्यं ऊधसि भवं क्षीरं; ऋषेः महर्षेः वसिष्ठस्य, अनुज्ञां अनु-

मतिं, अधिगम्य प्राप्य, रक्षितायाः धर्मेण परिपालितायाः, उर्व्याः भूमेः, षष्ठांशमिव भूपालैः आदेयं षष्ठं भागमिव उपभोक्तुं स्वीकर्तुं, इच्छामि वाञ्छामि ।

वत्सस्य वत्ससम्बन्धि, सम्बन्धः तत्पानानन्तरं यद्दोहनं तत्कर्मत्वरूपः । वत्सपानेन क्षीरस्य शुद्धिः । अत एव मृतवत्सायाः गोः क्षीरस्य पाननिषेधः । होमशेषोपयोगोऽपि शास्त्रविहितः । "यज्ञशिष्टाशिनः सन्तः" इति । गुरोरनुज्ञाम् । धेनोराज्ञा लब्धा । गुरोरनुज्ञाऽप्यपेक्षिता । तव औधस्यमिति क्षीरान्तरापेक्षया अस्य क्षीरस्य वैशिष्टयं तत्र स्वकीय बहुमानं च ज्ञापयति । उपमानेन क्षीरस्य इदृशोपभोग एव धर्म्य इति व्यज्यते ।

इच्छामीति विनयोक्तिः । तव आदेशो मयाऽवश्यमनुष्ठातव्यः । न खलु तदतिलङ्घनं मनसाऽप्यहं चिन्तयेयम् । अथापि मयि वात्सल्यातिशयेन त्वयि क्षीरपानं सद्यो मया कर्तव्यं आदिशन्त्यामपि मम ईदृशी इच्छा । यदि त्वमनुमन्यसे तथा करिष्यामीति सविनयमाह ॥

**इत्थं क्षितीशेन वसिष्ठधेनुर्विज्ञापिता प्रीततरा बभूव ।**
**तदन्विता हैमवताच्च कुक्षेः प्रत्याययावाश्रममश्रमेण ॥ ६७**

इत्थं पूर्वश्लोकोक्तरीत्या, क्षितीशेन राज्ञा, विज्ञापिता सविनयं कृतनिवेदना, अपकृष्टैः उत्कृष्टान् प्रति कथनं विज्ञापनम् । वसिष्ठधेनुः नन्दिनी, प्रीततरा पूर्वापेक्षया अधिकप्रीतिमती, बभूव आसीत् । तदन्विता तेन दिलीपेन अनुगता, हैमवतात् हिमवत्पर्वतसम्बन्धिनः कुक्षेः मध्यप्रदेशात् गुहाभ्यन्तरादिति भावः । आश्रमं महर्षेः आवासं, अश्रमेण आयासं विना, प्रत्याययौ च प्रत्यागतवती च ।

पूर्वमेव स्वपरिचर्यया प्रीता नन्दिनी इदानीं प्रीततरा बभूव। वात्सल्यभूम्ना तदानीमेव क्षीरपानं कर्तव्यमिति नन्दिन्युवाचेति यद्यपि दिलीपो मेने तथापि वस्तुतः सा तस्य अपरां अल्पां परीक्षामेव चकार। नन्दिन्या तथा आदेशे कृते प्रायः अन्ये सर्वे सद्यः तथा कर्तुं प्रवर्तेरन्। अभिमतार्थप्राप्तितृष्णा तथा तान् अविवेकिनः कुर्यात्। महाराजस्तु धीमान्, प्रतिभाशाली, आकर्षकेषु विषयेषु सत्स्वपि धृतिरक्षणशीलः तदानीं अलुप्तविवेकः "वत्सस्य होमार्थविधेश्च शेषं" इत्यादि वदन् आत्मवत्तामात्मनः प्रख्यापयामास। इमामपि परीक्षामुत्तीर्णोऽभूत्। अनेन हेतुना नन्दिनी प्रीततरा बभूव। सूर्यास्तमयकालप्रतीक्षां अकृत्वा सद्यः प्रस्थिता अतित्वरया आश्रमं प्राप। त्वरितगत्या तस्याः श्रमो नाभवत्। महाराजं प्रति जातः प्रीतिविशेषः श्रमबुद्धिं अत्यन्तं न्यरुन्ध।

"हैमवतात् कुक्षेः आश्रमं प्रत्याययौ" इत्ययं वाक्यविन्यासः मध्ये इतस्ततः दृष्टिं न प्रसारयामास, न किमप्यपश्यत्। दिलीपेन कर्तव्यं क्षीरपानं एकं चिन्तयन्ती आजगामेति सूचयति। प्रीततरा बभूव, प्रत्याययौ चेति चकार समुच्चयेन सह अविलम्बमपि ज्ञापयति।

## सहधर्मचारिणी उत समधर्मचारिणी ?

P. Ramamurthy, M.A.

(अनुवृत्तम्)

भास्करभानुमतीसंवादात् अंबुजाक्षस्य आन्तरं पिहितं विवेककपाटं विजघटे। "किं चारुमती अपराधिनी अविनयवती या अवाप्ते बोनस्धने प्रकृष्टेन प्रेम्णा दयिताय आवश्यकानि वस्तूनि

अक्रीणात् ?। पुरुषोऽपि तथैव आचरेत् अवाप्ते अधिके बोनस्धने। रागग्रस्तोऽहम् तथा, अहह, नैव अकरवम्। मूर्ध्ना लालनीयं कुसुमं चरणेन अताडयम्। किन्नाहं पुच्छविषाणहीनः मनुजपशुः?। या धनं आर्जयति, तस्य व्ययेऽपि तस्याः प्रभुता अनुस्यूता आयाति। विवेकविश्रान्तोऽहं डित्तडवित्तादिभिरपि विदितं इदं सत्यं न अजानाम्। "भ्रातृपत्नी भानुमती भार्यावर्गाणां मार्गदर्शिनी" इति धिया अवलिप्तं अभवत् मम मनः। विधने काले विशेषविनयः, सधने समये अनुचिताविनयश्च—किमिदं भर्तृप्रणयिनीनां कुटुंबिनीनाँ लक्षणम् ?। अधने काले भार्यासु भासमानः विनयः विस्मयं न प्रयच्छति। स्वार्जिते धने अधिकेऽपि, या भर्तृसुखायैव आत्मानं अर्पयति, तस्य आनन्दे आत्मनः आनन्दं आलोकयति सैव सहधर्मचारिणी कमनीयकल्पलतिका। भानुमत्यां अयं उत्तमः उन्नतः गुणः नास्त्येव। नूनं चारुमती भानुमतीं अतिशेते। धन्योऽहं यदनेन अनुभवेन ज्ञातव्यं सत्यं अजानाम्। यदेवोपनत दुःखात् सुखं तद्रसवत्तरम्। निर्वाणाय तरुच्छाया तप्तस्य हि विशेषतः" इति ध्यानोदधौ ममज्ज।

"अरे अंबुज, प्रत्युत्तरं अब्रुवन् कि निमीलितनयनः समाधिगत इव तिष्ठसि" इति साधिकारं जगर्ज भास्करः।

"प्रियपूर्वज, रूप्यशतमेव त्वमपेक्षसे। श्वः ध्रुवम्" इति असमाप्तप्रतिवचने अंबुजाक्षे, भास्करः "कदा वा प्रतिददामि" इति नैवाहं अधुना वेद्मि। भानुमतीव त्वमपि प्रतिदिनं प्रतिदानाय पीडयसि चेत् अनिवेद्य संन्यस्तवान् स्याम्। अधुना वैराग्यमेव मम अभयं भवति" इति दुःखसंवेदनाय जात इव जगाद।

"आर्य, आर्य, किन्न आवाँ सहोदरौ। अहं प्रतिप्रदानं नैव अपेक्षे। त्वमपि प्रतिदातुं नैव यतस्व। आवाँ इन्द्रोपेन्द्राविव शरदः शतं भवावः" इति भ्रातृवात्सल्यकंपितकण्ठः प्रत्यब्रवीत्।

तेन श्रोत्रपेयेन सौभ्रात्रस्यन्दिना प्रतिवचनेन हृष्टः तुष्टः भास्करः, "भानुमति, पश्य पश्य। चारुमती ध्रुवं दद्यात् इति निर्णयेन अंबुजः अपेक्षितं धनं दातुं प्रतिजज्ञे। स एव भाग्यवान्, यतः तस्य पत्नी पतिप्रसादप्रणयिनी" इति ममुदे।

भवनाय प्रस्थितः अंबुजाक्षः "रूप्यशतं दद्याम्" इति प्रत्यश्रौषम्। चारुमती धनदानविमुखी यदि, किं कुर्याम्" इति चिन्तासूचिकया विद्धहृदयः यदा द्वारदेशं प्राप, तदा महानसात् उत्थित वातानीतं पारस्परिकसल्लापरवं श्रुत्वा तत्रैव तस्थौ।

"बोनस् धनं अवाप्तं इति वदसि। वत्से, नितरां सन्तुष्टाऽस्मि। जाते, इतोऽपि अधिकतरं भाग्यं प्रवहतु। तेन सार्धसहस्रेण किं अकरोः" इति माता चारुमतीं पृच्छन्ती अभवत्।

"अंब, त्वमेव जानासि कियता श्रमेण स्वसुखनिरभिलाषः मम स्यालः तव जामातरं पितेव परिपालयन् ईदृशे उन्नते स्थाने स्थापयामासेति। अहं तस्मै पुरुषपुरन्दराय क्षौमयुगलं कनकरेखाङ्कितं, तस्य श्रीमत्यै भार्यायै पर्यन्तेषु काञ्चनरेखास्यूतां काञ्चीपुरपट्टचेलां, अपत्यानाँ वस्त्राणि कञ्चुकानि च उपहारीकृत्य शाश्वतिकं कार्तज्ञ्यं निवेदयितुं अभिप्रैमि। तथाऽपि तव जामातुः अनुज्ञाँ अनवाप्य एवं नैवाचरेयम्। अंब, अंब, पश्य इदं भवज्जामात्रे मया क्रीतं टेरिलिन् पादकञ्चुकम्। किन्नेदं मृदु मनोहरञ्च?" इति चारुमती उवाच।

वत्से, मन्नयनकनीनिके, त्वं अलोकज्ञा। अधिकृतानां परिणीतानाँ युवतीनाँ महत् कष्टं किञ्चिदस्ति। पितृगृहे यथेच्छं आचरन्ती अनपराधिनी भवेः। पतिगृहे तथा भवितुं यतसे यदि, महती अनर्थपरंपरा क्षणार्धेन आविर्भवेत्। तस्मिन् आवर्ते पतिता, मुग्धे, त्वं कथं स्वस्था भविष्यसि?। अतः भर्तारं पुरस्कृत्य

कर्तव्यमखिलं कुरु। अयमेव मार्गः तव सुखं, श्रेयश्च अनवरतं वितरेत्। पुरुषाः कुटुंबसाम्राज्यस्य आधिपत्यं नैव जहति। अमुं उपदेशं, भद्रे, सर्वदा स्मरन्ती भाग्यवती गृहिणी भव" इत्यनुशाशस अनुजग्राह च।

"अंब, अंब, इदं सत्यं अजानाना...." इति आरब्धं वाक्यं परिसमाप्तुमपि अक्षमा चारुमती मुक्तकण्ठं अरोदीत् चेलाग्रेण वदनारविन्दं आवृत्य।

सर्वमेतत् समग्रं श्रृण्वन् अंबुजाक्षः स्मयमानः "भार्या सहधर्मचारिणी उत समधर्मचारिणी" इति विचारः, "वृक्षस्य कारणं बीजम्, उत बीजस्य कारणं वृक्षः" इति शुष्कविवादसमानः विवेकविश्रान्तानाँ विनोदायैव कल्पते। अकृत्रिमं अहेतुसंभवं हि आन्तरं प्रेम। तद्धि पदार्थान् व्यतिषजति। तादृशं प्रेम बहिरुपाधीन् नैव अपेक्षते। स्नेहश्च निमित्तसव्यपेक्षश्चेति विप्रतिषिद्धमेतत्। भार्या सहधर्मचारिणी वा भवतु, समधर्मचारिणी वा अस्तु। तत्तस्य किमपि द्रव्यं यो हि यस्य प्रियो जनः" इति सुमधुरस्य सत्यस्य प्रतिभानेन प्रहृष्टः," अयि प्रिये, अयि चारुमति" इति यथापूर्वं पुंस्कोकिल इव कूजन् गृहगर्भं दधाव।

## कविसमयाः कवीनामक्षयपात्रम्।

उडुपि वेङ्कटकृष्णरायः

(अनुवृत्तम्)

यदि च पाश्चात्याः सौन्दर्यमानन्देन सङ्कलय्यैहि... य सार्थकतां, प्रा..पादयन्ती, अस्माकमालंकारिका यत्रैव न विरमन्ति, परन्त्वेतद्द्वयमपि ब्रह्मानन्दपर्यन्तमपि पर्यवसाययन्ति, एते द्वे ब्रह्मा-

नन्दस्यैव कलात्वेनैव परिगणनमर्हति इति सुस्पष्टमुद्घोषयन्ति। अन्यच्चेदं सम्यक् अवधेयमस्माभिर्यत्सौन्दर्यस्य मानदण्डः सद्गुणाः, रूपं सर्वथा न पापवृत्तय इत्यविश्रान्ततया कालिदासादिभिः भारतीयैरभ्युपगम्यते, बाह्यसौन्दर्यमिवाभ्यन्तरशुद्धिरपि सर्वत्रापेक्ष्यते। अन्तः शुद्धस्त्वमसि भविता वर्णमात्रेण कृष्ण इति यदा च कविसार्वभौमो मेघं प्रति वक्ति तदाऽस्य व्यङ्ग्यार्थ ईदृश एवेति सुस्पष्टमेव। परन्तु पाश्चत्यानाँ काव्यं लोकवृत्तानुकथनमिति बाह्यान्तरैकरूपता तैः नाद्रियते। अस्माकं काव्येषु Iago सदृशान् मानवराक्षसान् वयं नैव द्रष्टुं प्रभवामः। यदि च रावणः रामरूपं धृत्वा सीतायाः पुरतस्तिष्ठेत्तर्हि पतिव्रतावन्दनमेव कर्तुं तस्य मनस्याशय उदियादिति सुस्पष्टमेव कुत्रचिन्नाटके पठामः।

यशः शरीरे भव मे दयालुरिति रघुवंशे द्वितीये सर्गे सिंहं दिलीपः प्रार्थयामास। कीदृशमिदं शरीरमिति विचार्यमाणे कविसमयानुगृहीतमेवेदं सुस्पष्टं प्रतीयते। कविप्रजापतिर्नूनं नूतनमनश्वरं शरीरं सृजति, यद्ब्रह्मनिर्मितमिव न कदापि जन्ममृत्युजराव्याधिभिर्न कथञ्चिदपि ग्रस्तं भवति। इदमेव शरीरमुद्दिश्य प्रसिद्धौ विमर्शकावित्थं प्रशंसतः –

आदिराजयशोबिम्बमादर्शं प्राप्य वाङ्मयम्।
तेषामसन्निधानेऽपि न स्वयं पश्य नश्यति ॥ (दण्डी)

उपेयुषामपि दिवं सन्निबन्धविधायिनाम्।
आस्त एव निरातङ्कं कान्तं काव्यमयं वपुः ॥ (भामहः)

यदा च वाल्मीकिः 'यावत्स्थास्यन्ति गिरयः सरितश्च महीतले तावद्रामायणकथा लोकेषु प्रचलिष्यति' इति जगौ, तावत्स रामकथाया ईदृशमेवाजरामरं वपुरनुगृहीतवानिति वक्तुं पार्यते। आङ्ग्ल्यामपीत्थमेव Robert Southey नामकः कश्चन कविः

आत्मनः सरस्वतीभाण्डागार एवोपविष्टः पुरातनैर्ग्रन्थकृद्भिः सार्कं मैत्रीसंलापं सर्वदा करोमीति प्रतिज्ञाय तान्सुहृत्त्वेन गणयामास

My never failing friends are they,
With whom I converse day by day — Scholar.

कविप्रजापतिसृष्टेरन्यद्वैशिष्ट्यमस्माभिरवधेयं यथा स्वयं प्रजापतिरपीमाँ नूतनां शक्तिमपहर्तुं न समर्थः। अत्र च प्रमाणमस्माकं भर्तृहरिश्लोके उपलभ्यते यथा—

अंभोजिनीवनविहारविलासमेव हंसस्य हन्ति नितरां कुपितो विधाता।
न त्वस्य दुग्धजलभेदविधौ प्रसिद्धां वैदग्ध्यकीर्तिमपहर्तुमसौ समर्थः॥

अधुनैव वयं कीदृशः कविप्रजापतेर्महिमेत्यवधारयितुं किञ्चिदिव प्रभवामः।

इत्थं च कविसमयान्यदा कुशाग्रबुद्ध्या विविच्योपयुङ्क्ते तदा काव्ये नूतना सुषमा सञ्जायते, परन्तु यदा कविरेतेषां दासो भूत्वा वर्णनास्वेतानेव प्रयुज्यात्मनः पाण्डित्यं प्रकटयितुं प्रवृत्तो भवति तदा काव्यस्य सौभाग्यमपि कुण्ठितं भवति। विमृश्यैव विनिवेशिता एते अक्षयपात्रवद्भवन्ति। यद्यपि च कविसार्वभौम एतेषाँ नामनिर्देशादि न स्वयं कृतवान्, तथाप्येतेषाँ यथायोग्यं यथावसरं समीक्ष्य विनिवेश्यात्मनः कविकुलगुरुरिति नाम्नः सार्थक्यं प्रख्यापितवानिति वक्तुं पारयामः। इदं प्रथमतया राजशेखर एव स्वोपज्ञे काव्यमीमाँसानामके ग्रन्थे एतेषां नाम, लक्षणं, उदाहरणानि च सोपपत्तिकं प्रतिपादयामास। आनन्दवर्धनाचार्यस्य श्लोके किञ्चिदिव परिवर्तनं कृत्वा इत्थमुपसंहरामः सत्काव्यतत्त्वसमयस्फुरितप्रसुप्तकल्पं मनसि यद्रघुकार आसीत्तद्व्याकरोत् सहृदयोदयलाभहेतोः राजेन्द्रशेखर इति प्रथिताभिधानः॥

## ईश्वरः कर्षकश्च

### एकाङ्कं नाटकम् (अनुवृत्तम्)

(शिरोमणिः ए. वि. कृष्णवारियर्)

---

ई— वृक्षराज, स्वागतं ते।

वृक्षः— इदानीं धन्योऽस्मि।

ई— मित्र, अपि कुशलम्?

वृक्षः— प्रभो, ईदृशं मे कुशलम्। (सर्वं शरीरं दर्शयति) मह्यं एवं द्रुह्यन् अयं कर्षकः वृषभं हत्वा ध्रुवं भक्षयिष्यति।

ई— अहो कष्टात् कष्टतरं जातम्। (पश्यन्) क्व गतानि ते पर्णानि? एकमपि कुसुमं न। फलस्य का कथा? शाखाः छिन्नाः। व्रणे प्रदेशे निर्यासः घनीभूतः दृश्यते। किं वायुना पीडितो भवान्?

वृक्षः— भगवन्, न। पश्यतोहरेणानेन कर्षकेण एवं बलान्मुषितोऽस्मि।

ई— वृक्षराज, महद्विपादस्थानम्? कर्षक, वृक्षस्य वचनं किं सत्यम्? उच्यतामुच्यताम्।

क— सत्यमेव।

ई— किमर्थं भवानेवं वृक्षस्य सर्वस्वमपहृतवान्?

क— दोहदार्थं पर्णादिकमत्यन्तमपेक्षितम्।

ई— दोहदस्य अदाने?

क— कृषिः प्रभूतं न फलति।

वृक्षः— प्रभो प्रसीदतु भगवान्। प्रभूतानि कृषिफलानि मदायत्तानि।

ई— कर्षक किमुच्यते?

क— फलानि तस्मिन्नप्यायतन्ते। सत्यम्।

वृक्षः— भगवन् अयं कर्षकः वृषभराजाय तृणानि, बुसं, कडङ्गरं मण्डं च ददाति। मह्यं तु तुषमपि न। मम सर्वस्वमपहरति च। इदमपहरणमितः परं मास्तु।

ई— कर्षक भृत्यान्, वृषभं, वृक्षं च पीडयन् भवान् क्षेत्रपतिः पीडयतीति किं घोषयत्युच्चैः ।

क— भगवन् मया कृतया परपीडया क्षेत्रपतिना कृता मत्पीडा कथं विनश्यति ?

ई— सत्यं न विनश्यति। दोषे समे केवलमन्यतमस्य वचनीयता नास्ति खलु। भवतु इदं पृच्छ्यते। कर्षक, काले काले जलाधाराणाँ बन्धनं, कुल्याविरचनं, ईतिबाधानिवारणं च महता धनव्ययेन कः कृतवान् ? क्षेत्रे जातं महान्तं विवादं कः प्रशमितवान् ?

क— एतत् सर्वं स्वामी कृतवान्।

ई— कश्चित् शरीरेण मुख्यं कर्म करोति। अन्यस्तु वाचा। अपरस्तु मनसा। एषु कर्मसु यद्वरं तद्वदतु भवान्।

क—अपेक्षिते काले सर्वं वरं सम्पद्यते।

ई— वदतु भवान् क्षेत्रपतिः किञ्चित् फलमर्हति वा न वा।

क— अर्हत्येव। महान्तं भागं मा हरतु इति प्रार्थना ।

ई— प्रयतमानो जनः सर्वोऽपि प्राणधारणाय यावदपेक्षितं तावत् कृषिफलं गृह्णातु। अलाभशङ्कया मा सञ्चिनोतु। तेन दीयतामन्यस्मै तत्, यदधिकम्।

क— प्रभो, महता प्रयत्नेन अर्जितं कथमन्यस्मै दीयते।

ई— कर्षक, इयं भूमिः किमात्मनः कृते फलानि प्रसूयते प्रभूतानि। अयं वृक्षराजः आत्मनो हेतोः किं फलति ? अस्य वृषभराजस्य वंश्या धेनुरात्मनो हेतोः पयः प्रक्षरति किम् ?

क— न, न, एतत् सर्वं परार्थमेव।

ई— कर्षक, लोके सृष्टेषु प्राणिषु, धुरीणो मनुष्यः परार्थमपि प्रयत्नं कुतो न कुर्यात् ?

क—भगवन्, प्रसीदतु भवान्। भवत्प्रसादेन मे चक्षुरुन्मीलितम्। इतः परं परार्थमपि प्रयतिष्ये।

ई— साधु, कर्षक, साधु। भवान् जनेषु उत्तमो भवितुमर्हति। कर्षक, उत्तमानां सम्पदः फलं किम्।

क— आपन्नानामार्तेः प्रशमनमेव।

ई— कर्षक, सुतरां सन्तुष्टः। एते भवदीयाः सर्वे नितरामापन्नाः। भवान् सम्पदा एतेषामार्तिं प्रशमयतु। प्रथममात्मनः, तत आत्मीयस्य, ततो लोकस्य च रक्षणलक्षं धर्मं भवान् चरतु।

क— अनुगृहीतोऽस्मि। तथा करोमि।

ई— (भृत्यान् प्रति) भद्राः इतः परं माऽस्तु कलहः। भवन्तः प्रयत्नेन कर्षकं वर्धयन्तु। कर्षकः भवत्सु कामं वर्षतु।

भृ— भगवन्, यथा भगवानाज्ञापयति।

ई— (वृषभं प्रति) कर्षक, वृषभराजोऽयं पितामहवत् पूजनीयः एनं मा ताडय एतस्याङ्गानि परया मृजया विशोधय। गोष्ठं शुचि कुरु। एनं निहत्य मा भक्षय। व्याघ्रादिभ्यः सर्वदा पालय च।

क— यथाज्ञापयति भगवान्।

वृ— भगवन्, महान् परितोषः। कर्षकं पुनरपि परिचरिष्यामि।

ई— वृक्षराज, धन्यस्त्वम्। मृतोऽपि भवान् जनानामिन्धनादिरूपेण उपकरोति खलु। छिन्नानामङ्गानां पुनः प्ररोहेण भवान् भविष्यति युवा। जलसेचनादिना कर्षकः तव नूनं उपकरिष्यति।

क— यथाज्ञापयति भगवान्।

वृक्षः— सन्तुष्टोऽस्मि भगवन्।

ई— परस्परस्मिन् लोकोऽयं प्रीयतां यततां सदा।
फलानि च समं भुङ्क्तां, कलहं मा करोतु च॥

सर्वे प्रणमन्ति। ईश्वरः अनुगृह्य अन्तर्दधाति। अन्ये निष्क्रामन्ति।

(यवनिका समुल्लसति)

क—भगवन्, प्रसीदतु भवान्। भवत्प्रसादेन मे चक्षुरुन्मीलितम्। इतः परं परार्थमपि प्रयतिष्ये।

ई— साधु, कर्षक, साधु। भवान् जनेषु उत्तमो भवितुमर्हति। कर्षक, उत्तमानां सम्पदः फलं किम्।

क— आपन्नानामार्तेः प्रशमनमेव।

ई— कर्षक, सुतरां सन्तुष्टः। एते भवदीयाः सर्वे नितरामापन्नाः। भवान् सम्प्रदा एतेषामार्तिं प्रशमयतु। प्रथममात्मनः, तत आत्मीयस्य, ततो लोकस्य च रक्षणलक्षं धर्मं भवान् चरतु।

क— अनुगृहीतोऽस्मि। तथा करोमि।

ई— (भृत्यान् प्रति) भद्राः इतः परं माऽस्तु कलहः। भवन्तः प्रयत्नेन कर्षकं वर्धयन्तु। कर्षकः भवत्सु कामं वर्षतु।

भृ— भगवन्, यथा भगवानाज्ञापयति।

ई— (वृषभं प्रति) कर्षक, वृषभराजोऽयं पितामहवत् पूजनीयः एनं मा ताडय एतस्याङ्गानि परया मृजया विशोधय। गोष्ठं शुचि कुरु। एनं निहत्य मा भक्षय। व्याघ्रादिभ्यः सर्वदा पालय च।

क— यथाज्ञापयति भगवान्।

वृ— भगवन्, महान् परितोषः। कर्षकं पुनरपि परिचरिष्यामि।

ई— वृक्षराज, धन्यस्त्वम्। मृतोऽपि भवान् जनानामिन्धनादि-रूपेण उपकरोति खलु। छिन्नानामङ्गानां पुनः प्ररोहेण भवान् भविष्यति युवा। जलसेचनादिना कर्षकः तव नूनं उपकरिष्यति।

क— यथाज्ञापयति भगवान्।

वृक्षः— सन्तुष्टोऽस्मि भगवन्।

ई— परस्परस्मिन् लोकोऽयं प्रीयतां यततां सदा।
फलानि च समं भुङ्क्तां, कलहं मा करोतु च॥

सर्वे प्रणमन्ति। ईश्वरः अनुगृह्य अन्तर्दधाति। अन्ये निष्क्रामन्ति।

(यवनिका समुल्लसति)

## दशमोऽधिकारः (अनुवृत्तः)

इत्थं सपरिकरस्य श्रीविभीषणमिश्रस्य भगवच्चरणारविन्द-लाभप्रकारमभिधाय श्रीविभीषणभगवत्संवादमुखेन तस्य प्राप्तिरस-परिवाहमुदाहरति । –

अब्रवीच्च तदा वाक्यं रामं तत्र विभीषणः ।
धर्मयुक्तं च युक्तं च साम्प्रतं सम्प्रहर्षणम् ॥
अनुजो रावणस्याहं तेन चास्म्यवमानितः ।
भवन्तं सर्वभूतानां शरण्यं शरणं गतः ॥
परित्यक्ता मया लङ्का मित्राणि च धनानि च ।
भवद्गतं मे राज्यं च जीवितं च सुखानि च ॥
तस्य तद् वचनं श्रुत्वा रामो वचनमब्रवीत् ।
वचसा सान्त्वयित्वैनं लोचनाभ्यां पिबन्निव ।
आख्याहि मम तत्त्वेन राक्षसानां बलाबलम् ॥

अब्रवीच्च । श्रीमच्चरणयोः आत्मात्मीयभरसमर्पणात् 'तच्चित्तं यत् तदर्पणं' इत्युक्तरीत्या मनइन्द्रियवत्तायाः फलं लेभे । चरण-योर्निपतनात् शरीरवत्तायाः फलं अलभत । अधुना वागिन्द्रिय-मपि यथा कृतार्थं भवेत् तथा भगवति वार्तामेकां विज्ञापयामास ।

तत्र । सन्तुष्टस्य स्वामिनो लक्षणं "दिशत्यासनमभ्याशे" इति नीतिशास्त्रे यदुक्तं तद्रीत्या भगवति श्रीरामे निर्दिष्टवति सति, लक्ष्मणस्य महाराजस्य च उपसर्पणाय उपक्षेपकरणक्षमस्य हनूमतः पार्श्वे ।

तदा । कुशलप्रश्नकरणाय भगवतः अवकाशं न ददौ ।

रामम् । पूर्वं 'निवेदयत' इति वीरान् द्वारीकृत्य विज्ञाप-यामास । अद्य 'अस्माभिस्तुल्यो भवतु' इति महाराजदत्तातिशय-भाक्त्वात् साक्षाद् भगवता सम्भाषणे अधिचकार ।

विभीषणः । भगवता साकं अस्मिन् एकान्ते सल्लपति सति रावणानुसारिणां अन्तस्तापोऽजायत । भगवता अस्य अभयप्रदाना-नन्तरं एतदीयं भयं सर्वं एतद्विरोधिनां हृदये प्रविश्य वासं चकार ।

धर्मयुक्तं च। अस्य धर्मविशेष ईदृशः फलं दत्वा अविनष्टः, अस्य नाम कीर्तयतां सर्वेषां यथा रक्षणं भवेत् तथा "न जातु हीयते" इत्यस्यां स्थितौ अवर्तत। कृतज्ञतारूपेण स्थिरधर्मेण युक्तमिति च।

युक्तं च। स्वकृतज्ञतायाः परिषद्गौरवस्य च अनुगुणतया भगवतः अग्रे विज्ञापने क्रियमाणे सति, श्रवणे अलम्बुद्धिर्यथा न जायेत तथा कर्णामृतम्। वाक्यं वार्ताम्।

साम्प्रतं सम्प्रहर्षणं। इत उपरि किं फललिति चिन्तां विना "मनःप्रीतिरनायासात्" इत्युक्तरीत्या तादात्विकानुभवसारस्यमेव अतिवेलम्।

उपरितनौ द्वावपि श्लोकौ द्वयस्य पूर्वोत्तरखण्डौ विवृणुतः।

अनुजो रावणस्याहम्। समुदितेन त्रैलोक्येनापि अपर्यनुयोज्यतया अन्याय्यकरणेन राविंतवतः रावणस्य अनुजत्वात् तद्वासद्वूषिते उदरे जातोऽस्मि।

तेन चास्म्यवमानितः। मदीयान् दोषान् स्वयं दृष्ट्वा सात्त्विकैः कृतमवमानं प्राप्तवांश्चेत् सोऽपि कश्चिदतिशयः स्यात्। तद्विना पात्रापात्रविवेकमकृत्वा हितोपदेशप्रवृत्तोऽहं पापकर्मसु मूर्धाभिषिक्तेन रावणेन परान् नियुज्य परिभावितः तस्या अपि गोष्ठ्या अनर्होऽभवम्।

भवन्तं सर्वभूतानां शरण्यं शरणं गतः।

भवतः अनालोचितविशेषाशेषलोकशरण्यत्वात् रावणादप्यवरस्य ममापि भवान् शरणं भविष्यतीति पितामहवरप्रसादेन कस्मिंश्चित् आलोके प्रदर्शितवति शरण्यगुणपूर्तिमन्तं भवन्तं शरणं प्रपन्नोऽस्मि।

"सकृदेव प्रपन्नाय" इत्यादिरीत्या पूर्वमेव शरणागतिं अनुष्ठाय 'दत्तमस्याभयं मया' इत्युक्तरीत्या फलमपि प्राप्तवान् अद्य पुनरपि शरणागतिं न करोति। किन्तु स्वनिष्ठामनुसन्धाय स्वस्यापि यद्द भगवान् शरणमभवत् तत्र कृतज्ञः सन् अभिनन्दनं करोति।

## उपकारिणो विद्वांसः

श्री कारप्पङ्गाडु वेङ्कटाचार्यः

श्री व. न. श्रीरामदेशिकाचार्यः

श्री उडालि सुब्बरामशास्त्रिप्रधानाः

श्री ए. राधाकृष्णमूर्तिः

श्री चिलुक्कूर् वेङ्कटाचार्यः

श्री व. कृ. शेषाद्र्याचार्यः

नेल्लूर् वेदसंस्कृतपाठशाला-[ध्यापकाः


### Editorial Board Members

Sri Vidyalankara V. R. SRINIVASA TATACHARYA,
Vyakarana, Sahitya, Visishtadwaita Siromani.

„ D. T. TATACHARYA, Siromani, M. O. L.,

„ V. S. V. PATRACHARYA, Siromani.


अस्मत्प्रतिनिधी—

Sri V. S. Ranganathan, M. A., B. O. L.,
त्रिदण्डिमठ - दारागञ्ज्, ALLAHABAD.

„ D. Srinivasacharya, Siromani,
17/7, Sadam Wadi, Bhandup, Bombay-78


Editor & Publisher :

D.T. Tatacharya, Siromani, M O. L.,
113, G. South Mada Street, Tirupati (A.P.)

# PATRONS.

अहोबिलमठ श्री सन्निधिः ।

वानमामलै मठ श्रीस्वामिचरणाः ।

श्रीमत् आण्डवन् सन्निधिः ।

परकालमठ श्रीसन्निधिः ।

,, Raja Bahadur S. Aravamudu Iyengar, B. A., B. L. M. B. E.

,, Justice S. Varadachariyar, B. A., B. L.,

,, A. Srinivasa Iyengar, Mannargudi.

,, R. Gopalaswami Iyengar, Advocate, Madras.

,, K. Srinivasa Iyengar, Madurai.

,, J. Subramaniam, Advocate, Gopichettipalayam.

,, S. T. G. Varadacharyulu, Chittigudur.

,, M. Sankar Lal, Tirupati.

,, N. S. Chari, Bombay.

,, Seth Govind Babu Bangur, Calcutta.

,, T. V. Visvanatha Aiyer, Mylapore, Madras.

,, N R Srinivasa Iyangar, Madras.

,, K. Venkatachari, Bombay.

---

To

Sri ______________________

______________________

______________________

---

Pirnter - J. Radhakrishnan,
R. K. Press, Tirupati.

R. K. Press, Tirupati. Copies—350.

REGISTERED NO. H. 569

श्रीः

Book III

No. 9

969

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

(अभिनवमाला)

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनि सद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ।

पु. ३] कलि ५०६९–प्लवङ्ग–धनुः [सं. ९

# THE UDYANA PATRIKA

### A SANSKRIT MONTHLY
### NEW SERIES.

DECEMBER - 1967

भगवान् श्रीकाञ्ची देवराजः

**हस्ते हस्ते गोकुले गोपिकानां**
**हस्ते हस्तिक्ष्माधरे चाव[illegible]र्णम् ।**
**मस्ते मस्ते वेदवाचां चरन्तं**
**मस्ते हस्तौ संयुतौ न्यस्य नौमि ॥**

आशुकविसार्वभौम श्रीनिवासराघवाचार्यः

In case the previous issue is not received please inform the editor immediately.

Annual Subscription Rs. [illegible] Foreign Rs. 12/—

## विक्रेया ग्रन्थाः

| | | |
|---|---|---|
| १ | विशिष्टाद्वैतकोशः | २०-०० |
| २ | विशिष्टाद्वैतसिद्धिः (with an English Introduction) | १२-५० |
| ३ | शरीरसिद्धिः (Brahman The One Complex Reality) | ५-०० |
| ४ | भामहीयः काव्यालङ्कारः — | |
| | उद्यानवृत्ति समेतः | ७-०० |
| | आङ्गलोपोद्घातानुबन्धिवर्जितः | ५-०० |
| ५ | काव्यादर्शः – व्याख्याचतुष्टयसहितः | ७-०० |
| ६ | रामायणसारसङ्ग्रह – श्रीरामावतार - वनवास - रामराज्यपरिपालनादिकालनिर्णयपरो ग्रन्थः) | १-०० |
| ७ | ऋषिहृदयम् (अग्निमीले सूक्तव्याख्यानम्) | ०-३७ |
| ८ | कपीनामुपवासः | ०-२५ |
| ९ | मुग्धाञ्जलिः | ०-२५ |
| १० | सँस्कृतशिक्षा (बालपाठः) | १-०० |

---

## विषयाः

१. अञ्जलिः बलिश्च क्रूरेभ्यः।
२. शमदमौ।
३. धर्मो रक्षति रक्षितः।
४. पुस्तकपरामर्शः।
५. अभयप्रदानसारः।
६. अप्तवाक्।
७. भक्तिसारः।
८. रघुवंशः।
९. प्रकृतिभेदः।
१०. सुभाषितम्।

उद्यानपत्रिका।

अन्या वाचो विमुञ्चथ।

(अभिनवमाला)

वेदापहारविक्रोशद्वेधःखेदविमर्दिनम्।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पुस्तकं ३] कलि ५०६९.—प्लवङ्ग— धनुः [सं. ९

DECEMBER - 1967

## अञ्जलिः बलिश्च क्रूरेभ्यः

षड्दर्शनपारगः श्रीवाचस्पतिमिश्रः न्यायवार्तिकतात्पर्यटीकाया अन्ते एकं श्लोकं निबध्नाति। सोऽयम्—

क्रूराः कृतोऽञ्जलिरयं बलिरेष दत्तः
कायो मया प्रहरतात्र यथाभिलाषम्।
अभ्यर्थये वितथवाङ्मयपांसुवर्षै-
र्मामाऽऽविलीकुरुत कीर्तिनदीः परेषाम् '।

इति। प्रौढान् श्लाघनीयान् व्युत्पादकान् लोकोपकारकान् ग्रन्थान् प्रति दुर्जनकृतमिथ्यादूषणजालावलोकनजनितः अपारः क्लेशः इह ग्रन्थकृता आविष्क्रियते। कियति क्लेशभारे सति एवं भाषणे प्रतिभा प्रसृता भवेदिति धीमद्भिः सम्यक् चिन्तनीयम्। "एकान्तविध्वंसिषु मद्विधानाँ पिण्डेष्वनास्था खलु भौतिकेषु" इति कविशेखरोक्तरीत्या ग्रन्थकाराणां स्वशरीरापेक्षया स्वग्रन्थेषु श्लाघ्येषु परग्रन्थेषु च अधिकतर आदरः। अस्थाने दुर्जनैः व्यसनितया निरन्तरं क्रियमाणानि मिथ्यादूषणानि शृण्वतां तेषाँ उद्वेलः शोको जायते। परं तु किं क्रियताम्। स्थलकमलैः सह कण्ट-

कानिव चन्दनद्रुमैः सह सर्पानिव वेधाः सज्जनैः सह दुर्जनान् सृजति। न चैते कदाचिदपि स्वभावं जह्युः। वृश्चिकाः हन्यमानाः म्रियेरन्। न तु जीवन्तः दंशनादुपरताः साधवो भवेयुः। तदिदं साधु वेद श्रीवाचस्पतिमिश्रः। अथापि क्रूरान् एवं अनुनयति प्रार्थयते च, नूनं परिवाहकल्पनेन शोकधारणं सुकरं मन्यमानः।

## शमदमौ

शमदमशब्दौ भगवद्गीतासु दशमे, षोडशे, चरमे अष्टादशे चाध्याये प्रयुक्तौ। तत्र प्रथमस्थले "दमः शमः" इति क्रमः। अत्र दमः बाह्यकरणनियमनं, शमः अन्तःकरणनियमनम्, इति श्रीभाष्यकृतां विवरणम्। शङ्करभाष्येऽप्येवमेव। अत्र तात्पर्यचन्द्रिका —

> शमदमशब्दयोरेकैकस्य उभयनियमनाभिधानसामर्थ्येऽपि पौनरुक्त्यपरिहाराय विषयभेदे वक्तव्ये नियमनक्रमेण दमशमशब्दयोः बाह्यान्तःकरणविषयत्वोक्तिः।

इति। अष्टादशाध्याये "शमो दमः" इति क्रमः। अत्र भाष्यकृतां विवरणम्—शमः बाह्येन्द्रियनियमनं, दमः अन्तःकरणनियमनम्, इति। मूले क्रमविपर्ययात् विवरणेऽपि विपर्ययः। तात्पर्यचन्द्रिकोक्तरीत्या नियमनक्रममनुसृत्य अत्रापि विवरणमिति सुगमम्।

द्वितीयस्थले तु

> दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम्।
> अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम्॥

इति स्थिते प्रथमस्थलरीत्यैव "दमः बाह्यकरणनियमनं शान्तिपदाभिहितः शमः अन्तःकरणनियमनम्" इति विवरणस्य युक्तत्वेऽपि शङ्करभाष्ये तथैव व्याख्यातत्वेऽपि "दमः मनसो विषयोन्मुख्यनिवृत्तिसंशीलनम्, शान्तिः, इन्द्रियाणां विषयप्रावण्यनिरोधसंशीलनम्" इति भाष्यकारा व्याचक्षते। कुत इदमिति चेत् अत्र तात्पर्यचन्द्रिका —

> दमनं दमः! तच्चान्तःकरणकर्मकं अमार्गात् निवर्तनं प्रकरणान्तरादिसिद्धमाह – मनस इति। बाह्येन्द्रियनियमनं हि शान्तिशब्देन वक्ष्यति। एतेन केषाञ्चित् अनयोः शब्दयोः व्युत्क्रमेण अर्थव्याख्यानं निरस्तम्।

इति। अयं भावः। एकैकस्य शब्दस्य उभयाभिधानसामर्थ्यात् यथेच्छं बाह्येन्द्रियविषयत्वं अन्यद्द वा सुवचम्। न तत्रानुपपत्तिः काचित्। तथापि प्रौढा ग्रन्थकाराः नियामकं किञ्चिदाश्रयन्ति। तत्र नियमनक्रमं नियामकीकृत्य प्रथमस्थले भाष्यान्तरे कृतं विवरणं युक्तमेवेत्यभिप्रायेण भाष्यकाराः स्वयमपि तदेवाद्रियन्त। द्वितीयस्थले तु उभयोः शब्दयोः सह प्रयोगाभावात् प्रकरणान्तरदृष्टक्रमानुसारेण तत्र योऽर्थ उक्तः तदाश्रयणमपि युक्तमित्यभिप्रायेण अर्थविपर्ययमाश्रयन्ति। तस्मादेवंविच्छान्तो दान्त इत्युपनिषद्वाक्ये हि "शान्तः बाह्येन्द्रियाव्यापारत उपशान्तः। दान्तः अन्तःकरणतृष्णातो निवृत्तः" इति भाष्यान्तरे विवरणम्'। इदं शाङ्करमुपनिषद्भाष्यमादृत्य इहार्थमुक्त्वा अत्रत्यं तत्भाष्यं निरस्तं त्यक्तं भाष्यकारैः", इति। स्पष्टतरं चेदमुक्तं तात्पर्यचन्द्रिकायां शान्तिशब्दार्थपरभाष्यविवरणे - दमशब्देन मनोनियमनस्योक्तत्वात् शान्तो दान्त इत्यादिष्विव शान्तिरिह बाह्येन्द्रियविषयेत्यभिप्रायेणाह – इन्द्रियाणामिनीति। उपनिषद्वाक्येऽपि तथैवार्थो वक्तव्य इति नास्ति निर्बन्ध इति श्रीभाष्यकृतामाशयः। अयं शमदमाद्यधिकरणे

"आन्तरबाह्यकरणव्यापाररूपत्वात् कर्मानुष्ठानस्य" इति भाषणाद् ज्ञायते। शमदमेति सूत्रपदद्वयार्थमभिप्रेत्य हि यथासंख्यं आन्तर-बाह्यकरणेति भाषितम्। एतदनुसारि च उपनिषद्भाष्यकाराणां तत्र "शमः अन्तरिन्द्रियनियमनरूपः। दमः बहिरिन्द्रियनियमन-रूपः" इत्यर्थवर्णनम्।

"दम इन्द्रियनिग्रहः। शमः परमात्मनि निष्ठा "इत्यानन्द-तीर्थभाष्ये परमात्मनि मनसो नियमनस्यैव निष्ठाशब्दोक्तस्य शम शब्दार्थतया प्रतिपादनात्, तेन दमस्य बाह्येन्द्रियविषयत्वमात्रस्य वक्तव्यत्वाच्च भाष्यान्तरैककण्ठ्यमेवेति तद्व्याख्यानोक्तः भाष्या-न्तरखण्डनाभिप्रायो नास्तीत्यस्माकं मतिः।

वैराग्यहेतुको मनोविजयः शम इति, वशीकारसंज्ञेति चा-ख्यायते। विजितं च मनः तत्त्वविषयविनियोग्यतां नीयते। सेय-मस्य योग्यता दमः" इति भामतीकारः।

एवं विविधं नियामकमाश्रित्य तत्र तत्र शमदमशब्दार्थ-कथने ग्रन्थकाराणाँ प्रवृत्तत्त्वात् अत्र खण्डनमण्डनाभिप्रयो नोचित इति प्रतीमः।

---

पूर्वोत्थानमिवाचरत्यनुदिनँ पश्चाच्च शेते स्वयं
तारकारमणिप्रवालविलसन्मुक्तासरालङ्कृता।
पूता भूरि निषेविता द्विजगणैर्या रक्तपीताम्बरा
सत्पत्नीव रवेः सधर्मनिरता सन्ध्या समालोक्यताम्॥

दे. श्रीनिवासाचार्यः

वृश्चिकान् सृज सर्वत्र सर्वेश्वर न तं जनम्।
असङ्गतैकलेखाय ध्रियते येन लेखनी॥

## "धर्मो रक्षति रक्षितः"

R. Ramamurthy, M.A.

चैत्रो मासः। अग्निनक्षत्रसमयश्च अम्बरं आरोहन्नेव अंबरमणिः अंशुजालानि अग्निकणस्तोमसमानानि अवाकिरत् अवन्याम्। अंशुमतः आधिपत्यप्रणयीव वायुरपि नैजं शैत्यं विमुच्य उष्णतमं अवात्, अधिपतेः प्रीतये आत्मगुणत्यागः पञ्चभूतेष्वपि प्रकाशत इति सत्यं सूचयन्निव, राज्ञः राजत्वमतिशेते राजप्रणयिभिः आविष्कृतं आत्मसात्कृतं राजत्वं इति सार्वजनीनं तत्त्वं बोधयन्निव। विघटितविशालवातायना अपि गृहाः अनिलाज्यपानपीनेन अनलेन अवलीढा इव अभवन्। आतपस्य अतिकठोरतां असहमानाः सर्वेऽपि व्यजनहस्ताः, नीरसिक्तेन वस्त्रखण्डेन आवेष्टितशिरसः, स्वेदनिष्यन्दचिक्कणशरीराः अवर्तन्त।

भासमानस्य भानोः प्रचण्डः आतपः नितरां अबाधत आचार्यं सभेशम्। यस्मिन् पत्तनप्राये ग्रामे सः अजायत, तस्मिन्नेव तृष्णाविवर्जितः तृप्तः सः कालं नेतुं निरधारयत्। अमरवाणीविद्यालये अध्यापकपदवी अगण्यैरपेक्षिता, अङ्गनेव तमेव वव्रे। "यस्योभयं साधु स शिक्षकाणां धुरि प्रतिष्ठापयितव्य एव" इति कविसार्वभौमस्य भणितेः सः प्रत्यक्षं व्याख्यानमिव व्यलसत्। असमानेन वैदुष्येण, विवेकेन, विनयातिशयेन च अध्यक्षपदवीं अवाप्य, "पदवी महती, वेतनन्तु अल्पादप्यल्पं" इति न कदाऽपि धनतृष्णया गणयन्, "दैवी वाक्" इति महर्षिभिः मानितायाः सर्वभाषाजनन्याः अमरवाण्याः स्वसुखनिरभिलाषां सेवां बहुगणयन्, यशसः अक्षय्यः कोश इव प्रचकाशे। पञ्चाधिकषष्ठिवयाः सः पञ्चहायनेभ्यः प्राक् अध्यक्षपदवीं तत्याज बहुभिः प्रणयिभिः

साश्रुभिः निवारितोऽपि। तथापि सर्वेषां मनोनभसि अनस्तमितः अंशुमालीव सः अदीप्यत। तस्य अतिकल्याणगंभीरा, भवभूति-विभूषिता आकृतिः अविनीतानां विनयशिक्षणाय अवतीर्णेव अभासत। सः धर्मज्ञः, कृतज्ञः, सत्यवाक्यः, आचारतत्परः, शील-शैलश्च। प्रायशः यः धर्मवान् सः न धनवान्, यः अपत्यवान् सः अकिञ्चनः, यः भक्तिमान् सः भवबाधाबद्धपङ्गुश्च भवति। पर-स्परविरोधिनो गुणान् समुत्पाद्य, तान् एकस्मिन्नेव सन्निवेश्य, संजातेन दुरवस्थाचक्रेण भ्रामितं अस्वस्थं पुरुषपशुं विलोकयन् वामो विधिः विहसतीव। आशैशवात् अनुगतेन अकिञ्चनत्वेन सभेशः न चिखिदे यतः "यल्लभसे निजकर्मोपात्तं वित्तं तेन विनोदय चित्तं" इति श्रीशङ्करभगवत्पादानां उन्नतं उपदेशं अनुष्ठान-भाष्येण विवृण्वत तस्य तत् अनुजत्वं अभजत। परन्तु, विंश-तिवर्षदेशीया विद्याविनयविवेकोज्वला, सर्वावयवसौन्दर्यसंपदा-सर्वचेतांसि संमोहयन्त्यपि अविवाहिता आत्मजा तस्य अधिकाधिकं आधिं आतनोत्। "कन्यापितृत्वं खलु नाम कष्टम्" इति सना-तनं वचनं सदातनं सत्यं हि शंसति।

एकदा, "शंभो, शङ्कर, आर्तानां आर्तिवर्धने कथं तवापि उद्वेलः उत्साहः। बहिः आतपानलः तपति, अन्तः चिन्ताग्निः दहति। एवं वह्निद्वयेन व्याप्तशरीरोऽपि कथं प्राणिमि इत्यहमेव न वेद्मि। किं चिन्ता असाधारणः अनलः यः दहन्नपि न भस्म-सात्करोति ?। नाहं मरणात् बिभेमि। तदहं वृणोमि। तथाऽपि तदपि मां औदासीन्येन धिक्करोति। अथवा मरणेन किं साधितं स्यात् ?। किन्तु अविवाहिता आत्मजा विवाहिता भविष्यति ? किं वा "दुःखस्यान्ते सुखं पश्येत् सुधीः", "एति कल्याणमानन्दो नरं वर्षशतादपि" इति पुरातनानि वचनानि असत्यानि ?। हुम्, हुम्, "पुरातनम्", "शास्त्रम्" इति प्रलपन्ति लोकयात्रायां परि-

भूताः पण्डिताः, शुका इव शिक्षितशास्त्रोद्गारिणः। बुभुक्षितैः व्याकरणं किं भुज्यते? पिपासितैः काव्यरसं किं पीयते? किं धनार्थिभिः धर्मशास्त्रं पठ्यते। मन्ये अभाग्यवतः अपकर्तुं शास्त्रमपि स्वाकारं संहृत्य शस्त्रं भवतीति। मन्दभाग्योऽहं मन्दमतिरिव प्रलपामि। शास्त्रेषु शास्त्रज्ञेषु च दोषं आरोपयितुं को वा अहं अल्पज्ञः?। प्रभो पार्वतीपते, तव पीठायमाने मदीये हृदये निलीनं एकमेव कामं सफलयितुं परिपूर्णकामस्य तवापि अस्ति किं अन्तरायः?। कदा वा अहं इमां कुलवते गुणवते भर्त्रे प्रदाय, प्रत्यर्पितन्यास इव प्रकामं विशदान्तरात्मा स्याम्?। प्रणतार्तिहर, "बाह्यान्तरव्यापिनः सर्वज्ञस्य दयाकरस्य भवतः किं वेदनीयं मया?। शंभो, त्वं परमान्तरङ्ग इति मे चित्ते स्मराम्यन्वहम्" इति विमुक्ताभीषुणा, खेदकशाव्याघातनुन्नेन मनोहयेन नीयमानचित्तः समाप्तभोजनः सभेशः देहल्यां स्थापिते शिथिले पर्यङ्के उपाविशत्। तमनुगच्छन्ती पुत्री तन्निकटे तीर्थपूर्णं पात्रं श्रीमद्रामायणं, श्रीमद्भागवतं च निधाय व्यजनेन तं मन्दमन्दं वीजयितुं आरभत।

तदानीं तत्र आगता सभेशस्य भार्या धर्मवती, "अयि वत्से, शिवकामसुन्दरि, भोजतकाले तव पिता न किमपि अवदत्। अहमपि प्रश्नयितुं अक्षमा अभूवम्। ह्यः प्रभात एव वरान्वेषणाय माङ्गुडिग्रामं जगाम। गमनं सफलं अफलं वेति तव जननीं मामनिवेद्य मृण्मयभित्तिवत् वाचंयमः तिष्ठति। तत्र शुश्रूषां अनुबुभुक्षुः अयं उचितवरान्वेषणे आलस्यं औदासीन्यं च अवलंबत इत्यपि च तर्कयामि" इति वदन्ती वत्सायाः हस्तात् व्यजनं स्वीकृत्य पतिं अवीजयत्।

"जाने, मातः [illegible]। तव कृते मह्यं क्रुध्यति। कदा कस्याः अनया इयं अश्रुतपूर्वा वचनपरिपाटी अभ्यस्ता?। यदा एषा

व्यजनदण्डं तव हस्तात् अपाहरत्, तदा प्रास्फुरत् मे मनसि कोप-सदृश ताडनं दास्यतीति'' इति चित्तखेदं विस्मृत्य विहसन् अभाषत।

''नाथ, मृदु तीक्ष्णतरं यदुच्यते तदिदं भवतां वचनेषु दृश्यते। शोभनया मधुरया च रीत्या मां अनुचितभाषिणीं निर्दिष्टवन्तं भवन्तं भर्तारं अधिगता किन्न अहं भाग्यवती ?। प्रतिक्षणं असाधारणं इदं भागधेयं स्मरन्ती कुलद्वयदेवताभ्यः' साञ्जलिबन्धं आत्मनिवेदनं करोमि। तथाऽपि, गतेषु संवत्सरेषु सञ्जातेन प्रयत्न-वैकल्येन मम हृदयं मृद्भाण्डमिव भग्नं सहस्रधा शकलीकृतं च। अतः अर्थं अबुध्वा प्रालपम्। प्रणिपातप्रसन्नाः खलु भवन्तः। आवयोः वत्सायाः अपि ईदृशः प्रियतमः ... ......'' इति अतः परं किमपि वक्तुं अक्षमा अरोदीत्।

रुदतीं मातरं, खिन्नं क्लान्तं च पितरं पश्यन्ती शिवकाम-सुन्दरी शब्दं विना गृहान्तं अयात्। ''अयि मुग्धे, किं नाहं जाने तव हृदयम् ?। मम कटुष्णस्य प्रतिवचनस्य कारणं न तावत् कोपः, परन्तु खेदः। क्लान्तः, भग्नेन प्रयत्नेन परिभूतः क्षमया पृथ्वीसमोऽपि असमीचीनं अश्लीलभाषणं शृण्वन् कदाचित् क्रुध्य-त्येव। माङ्गुडिगमनकथां भोजनसमये न अकथयम् वत्सा श्रुत्वा आकुला भविष्यतीति भिया। अधुना शृणु सर्वं तं वृत्तान्तम्। ह्यः पेटिकां अवालोकयं यत् किमपि धनं किमस्ति इति जिज्ञासया। पूर्णचन्द्रबिंबसमानं धनं आसीत् तत्र। अतः पद्भ्यामेव माङ्गुडिग्रामं गन्तुं निरचिनवम्। दिष्टया उद्दिष्टस्य यूनः पिता भवने अवर्तत। सः पञ्चसहस्रं अपेक्षते। श्रुत्वा तडित्ताडित इव भ्रमितमस्तकः अतिष्ठम्। असत्यभाषणे अपरिचितोऽहं ''सहस्र-द्वयं ददामि। स्वर्णस्य स्थाने सुमनांसि निक्षिपामि। विवाहवैभवं च यथा अन्तरात्मा तुष्यति तथा नूनं भविष्यति। यदि कृपा

उदेति, लेखं मङ्गलकरं प्रेषयन्तु" इति दीन इव विज्ञापयन् गृहान् आगतोऽस्मि। अनेन परिभवोदयेन आरभते अयं संवत्सरः। धनमात्रदत्तदृष्टिः रूपदर्शने अन्धो भवति, गुणश्रवणे बधिरः वर्तते, कुलीनतागवेषणे उदासीनः आस्ते। आधुनिके काले गुणैः रूपगुणैश्च मण्डिता कलानाथमुखी कन्या अमरवाणीव अनादृता, अनपेक्षिता, अवमता च सीदति। कालेन कृतं कौटिल्यं कालेनैव उन्मीलनीयम्" इति सखेदं जगाद।

---

## पुस्तकपरामर्शः

श्री गुरुगोविन्दसिंहचरितम्। श्री सत्यव्रतशास्त्रिविरचितम्। Guru Gobind Singh Foundations, Patiala — अतो लभ्यम्। १० रूप्यमूल्यकम्।

चतुःसर्गीरूपं पद्यकाव्यमिदम्। चतुर्ष्वपि सर्गेषु उपयुक्तं वृत्तं उपजातिः इन्द्रवज्रोपेन्द्रवज्रामिश्रणरूपा। प्रतिसर्गं अन्ते वृत्तं भिन्नम्। शैली सरला ललिता मधुरा च। अयत्नसिद्धा रचना स्वाभाविकीं कवित्ववासनां कवेः सूचयति, सुस्पष्टं प्रकाशयति।

पञ्जापप्रदेशे युद्धवीरप्रसूः 'सीक्' इति प्रसिद्धा काचन जातिरस्तीति सर्वे जानन्ति। क्रूरकर्मणां यवनानां पीडां असहमानैः तान् पराजित्य अस्मद्देशीयचिरन्तनधर्मस्थापनाय स्थापितेयं वीरजातिरिति पुराविदो वदन्ति।

एतस्या जातेः गुरुभक्तिरधिका। एतदीयगुरुपरम्परायां दशमो गुरुः श्री गुरुगोविन्दसिंहः। अस्य चरितं प्रकृतकाव्यस्य विषयः। अस्य जन्मनः प्रभृति शत्रुकृतद्रोहकर्मणा जातं मरणं यावत् यद् वृत्तं तत्र प्रधानांशा इह प्रसन्नमधुरपद्यमालया वर्ण्यन्ते। गुरुसिंहस्य प्रज्ञाविशेषः निर्भयत्वं धार्मिकत्वं अमानुषशक्तिमत्त्वं वैराग्यं मतविशेषप्रवर्तकत्वं इत्यादि प्रत्यक्षमिव अत्र लक्ष्यते।

कविः श्रीसत्यव्रतः शास्त्री निसर्गसंस्कारसम्पन्नविनयातिशयः विद्यार्थिदशातः प्रभृति अध्यापकैः अन्यैश्च अभिनन्दितप्रज्ञाविलासः बहुग्रन्थकारः अर्धाधिकेन एकेन मासेनैव इदं काव्यं प्रणिनायेति अद्भुतमेतत्।

कुलक्रमागतं व्याकरणपाण्डित्यं अस्मिन् सुष्ठु विकसितं दृश्यते, यतः लक्ष्यज्ञमहावैयाकरणैकसुकराः व्युत्पन्नपदप्रयोगा इह बहुलं विलोक्यन्ते ।

"भक्तश्च भृत्यश्च प्रियो गुरूणां" "शीघ्रं यथा स्यात् तव प्राणरक्षा" (४–४४) इति लघोः परः रेफोत्तरसंयोगः बहुशो निबध्यमानः पद्यपठनधारां विहन्तीति भाति।

## अभयप्रदानसारः।

### दशमोऽधिकारः (अनुवृत्तः)

पूर्वमेव "राज्यकाँक्षी च राक्षसः" इति स्वस्य जातं अभिशंसनं यथा निवर्तेत तथा स्वकीयाँ अनन्यप्रयोजनतां उत्तरखण्डानुसारेण प्रकाशयति।

परित्यक्ता मया लङ्का। अस्माकं कुलक्रमागतदुर्गनिलयभूतामपि इमां हरिबाह्यानाँ बाह्ली(ही)कानाँ देशं सत्त्वस्था इव सवासनं त्यक्तवानस्मि। परित्यक्ता परितस्त्यक्ता। तत्पुरसम्बन्धवन्ति सर्वाण्यपि प्रति जुगुप्सावान् अस्मि। मया परित्यक्ता, अहं परित्यक्तवानस्मि। भवान् पुनः लङ्केति नाम कृत्वा काञ्चन शृङ्खलां किन्नु आसञ्जयतीति प्रकम्पितोऽस्मि।

मित्राणि च। 'मित्रद्रोहे च पातकं' इत्यस्यां स्थितौ भवद्विरोधीनि मित्राणि शत्रव इति त्यक्तवानस्मि।

धनानि च। 'आपदर्थं धनं रक्षेत्' इत्येवंभूतानि धनान्यपि तत्सम्बन्धेन आपदां कारणान्यभूवन्निति पश्यन् परित्यक्तवानस्मि।

चकारेण 'पितरं मातरं' इत्याद्युक्तरीत्या भवत्सेवाविरुद्धानि सर्वाणि परित्यक्तवानस्मीत्याह ।

पौरजानपदाः पुरुषार्थत्वेन यदभिमन्यन्ते तस्य सर्वस्य त्यक्तत्वेऽपि तद्विरहजं औत्सुक्यं चित्ते किं न भवेत् इति चेत् क्षीरसागरास्वादं लब्धवतः शुनीक्षीरविरहेण किं हानिः काचन भवतीत्याह-भवद्गतं मे राज्यं च जीवितं च सुखानि च, इति । भोगोपकरणानि, भोक्तुर्मम सत्ता, भोगाः, इति सर्वं भवदनुभवरूपस्य महासमुद्रस्य शीकरेषु लग्नं भवेत् । इदं समुद्रे गोष्पदमप्यस्तीतिवत् स्थितं भणितम् ।

इत्थं अनन्यप्रयोजनस्य विभीषणमिश्रस्य उपरि राज्यप्राप्तिः कथमिति चेत् रामनियोगानुपालनरसिकस्यास्य

त्वत्कामनातो धननिःस्पृहा ये
तानेव वाञ्छन्ति यथा धनानि''

इत्युक्तरीत्या केवलं प्राप्तम् ।

इत्थं शरणागतवचने आसक्तस्य भगवतो जातां अनुकम्पां तन्मूलप्रतिवचनप्रकारं च वदति—तस्येत्यादिना ।

तस्य । अनन्यशरणस्य अनन्यप्रयोजनस्य च ।

तद् वचनम् । आकिञ्चिन्यानन्यगतित्वपुरस्कारपूर्वकं द्वयार्थकथनम् ।

रामो वचनमब्रवीत् । ''द्विः शरं नाभिसन्धत्ते द्विः स्थापयति नाश्रितान् । द्विर्ददाति न चार्थिभ्यो रामो द्विर्नाभिभाषते ॥'' इति चेत् उपश्लोकनं क्रियते तद् यथा पारमार्थिकं भवेत् तथा गुणातिशयवान् भगवान् श्रीविभीषणमिश्रसम्बन्धि कार्यं प्रति इतः परं वक्तव्यस्य कस्यचिदभावात् स्वावतारप्रयोजनदुष्कृद्विनाशोपयोगितया

आख्याहि मम तत्त्वेन राक्षसानां बलाबलम् ।

इति राक्षसवृत्तान्तं पप्रच्छ ।

वचसा सान्त्वयित्वैनम्। "अस्मदर्थं किल इतः प्राक् भवता अनुभूतः सर्वः क्लेशः। इदं सर्वं पूर्वमेव यत्र निर्वृत्तं तेन सापराधाः वयमेव हि क्लिष्टाः" इत्येवमादिरूपमधुरवचनेन तं द्रावयित्वा अब्रवीत्।

लोचनाभ्यां पिबन्निव। वचनावसरे अतिपिपासाकुलः पानीयदर्शने यथा न मुञ्चेत् तथा "साभिमानं स्वयं मां कात्स्न्येन पिबति स्म" इत्यादिरीत्या अनुभवन्, अनवधिकदयासौहार्दानुरागगर्भाभ्यां श्री वैकुण्ठनाथः मुक्तं यथा सानुकम्पं पश्यति तथा शिशिरं दृष्ट्वा, करकाप्रक्षेपेणेव "शीतीभूतो निरामयः" इत्येवं तं कुर्वन् अब्रवीत्।

इत उत्तरं यदस्ति तत् सर्वं श्रीविभीषणमिश्रमनोरथविषयकैङ्कर्यानुरूपकुतूहलविजृम्भितमिति द्रष्टव्यम्।

राकान्ते रुद्धलङ्कश्च्युतफणिकदनो धूम्रदृग्वज्रदंष्ट्रौ
भङ्क्त्वाऽकम्पं प्रहस्तं दशमुखमकुटं कुम्भकर्णातिकायौ।
ब्रह्मास्त्रच्छिन्नकुम्भादिकमथ मकराक्षं च हत्वेन्द्रशत्रुं
जित्वा घस्त्रैस्त्रिभिस्तं सहबलमवधीद् रावणं रामभद्रः॥

अपदिश्य वेङ्कटेशं स्वहस्तसंसक्ततूलिकातुल्यम्।
अभयप्रदानसारं गुरुप्रसादः स्वयं व्यलिखत्॥

इति
कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य
कृतिषु अभयप्रदानसारे
प्राप्तिप्रकारप्रपञ्चः
दशमोऽधिकारः

अभयप्रदानसारः सम्पूर्णः

## आप्तवाक्?

( पी. नारायणाचार्यः। वाराणसी। )

रामः— वयस्य, प्रभातमात्रायां शर्वर्यां कुत्रैवं सत्वरं यासि?

कृष्णः— आः! आगतोऽसि खलु! मम सर्वं कृत्यमद्यैव निर्वर्तितमिव।

रामः— कुतो नु मित्र, मयि तवैतावान् अन्यथाग्रहः? किं मयाऽपकृतम्।

कृष्णः— कोऽन्यो ममापकारोऽस्ति? प्रातरुत्थाय पत्रिकामुखवीक्षणं मम त्वया वाचाटेन विहतमभूत्।

रा— एवमेवैतत्। तथापि तावता तव का वाऽर्थहानिरभूत्। ब्रूहि।

कृ— मुख्यतो मम मानसं दूयते बहु। नानावार्तावीक्षणबुभुक्षा तादृशी मम।

रा— अरे! तवेदं दुरन्तं व्यसनमुपस्थितम्। मद्यद्यूतादिष्विवात्रापि प्रसक्ता अन्यन्न गणयन्ति अतिक्रान्तमप्यावश्यकम्। नापत्रपन्ते। न वा देहश्रमं बुध्यन्ते।

कृ— अस्त्वेवम्। ज्ञानलाभाय शरीरं क्लेष्टव्यमेव। ज्ञानतृष्णा निष्णातैरपि न त्यज्यते। लोकवृत्तान्तमपरिज्ञाय कोऽपि न लोके निवस्तुमर्हति। तदा हि बहुपशुरेवायं भविष्यति।

रा— सखे, अवश्यमेतदङ्गीकुर्याम्, यदि वृत्तान्तपत्रिकया ज्ञातव्यमात्रज्ञापनं क्रियेत। न ह्येतदस्ति। बहून्याधुनिकविज्ञानवैचित्र्याणि, तत्र तत्र देशेषु जनानाँ प्रकृतिभेदः, नानादेशीयमहनीयानाँ मनीषितं, यात्रानुभवरसाः, वैद्यकपरिशोधनानि इत्यादयो बहवो विषया वक्तव्याः सन्ति। ज्ञातव्याश्च भवन्ति। प्रकाशनीया वर्तन्ते।

कृ— नन्विमे विषयाः पत्रिकायाँ प्रकाश्यन्त एव।

रा— एते क्वचिदेव गोचरा भवन्ति। पत्रिकाया बहूनि पृष्ठानि तु विषयान्तरेण व्याप्तानि दृश्यन्ते। अपरासु च पत्रिकासु सर्वथा विषयान्तरस्यैव प्रस्तावः क्रियते।

कृ— विषयान्तरमिति किमभिप्रेतं मित्रेणात्र। जिज्ञासेऽहम्।

रा— ननु शाकुन्तकं नाटकं किमपाठीः ?।

कृ— किं त्वं व्यस्मरः ? त्वयैव हि सहाहं तदध्यगीषि पुरा गुरुकुले। त्वत्त एवाध्यगच्छमिति वा वक्तव्यम्। त्वमेव खलु ममानुचिन्तनं काले काले कारयन्नासीः ?

रा— तर्हि ब्रूहि पूर्णम् – "आजन्मनः शाठ्यमशिक्षितो यः....

कृ— तस्याप्रमाणं वचनं जनस्य। परातिसन्धानमधीयते यैर्विद्येति ते सन्तु किलाप्तवाचः॥"

रा— पूर्वार्धं त्वं व्याख्याहि। तदनु उत्तरार्धमहं व्याकरोमि।

कृ— ओम्। तथैव भवतु। शृणु। कण्वशिष्यौ शारद्वतशार्ङ्गरवौ शकुन्तलामादाय राज्ञः समीपमागच्छतः। राजा च सुप्तोत्थितो भवान्तरीयमिव शकुन्तलापरिणयादिकं स्वेनैव कृतं विस्मरन् बलवत् प्रतिषेधति।

रा— ततस्ततः।

कृ— वृत्तं विवाहादिकं ससाक्षिकं निरूप्यापि राज्ञा निराकृतौ तौ ऋषिशिष्यौ कार्ये निराशौ सातङ्कं कीर्तयतः।

रा— किमिति, किमिति।

कृ— आजन्म आश्रमे परिश्रम्य ये वृक्षलतादिभिः सह सँवृद्धाः, ये "गतान् पशूनां सहजन्मबन्धुतां ... कृतानुकारानिव गोभिरार्जवे" इत्युक्तदिशा परमार्जवेन, विना शाठ्यं विनयाधानेन शिक्षिताः, तेषाँ तापसानाँ वचनमाप्ततमं नागरिकस्य नृपतेस्ते सदसि सपद्यप्रमाणमभूत्। किन्तु, आः! कष्ट......

रा— वयस्य, तिष्ठ तिष्ठ! अहमेव चरमार्धार्थं पूरयामि।

# भक्तिसारः (२)
## (तिरुमलिशै आल्वार्)

तञ्जापुरमण्डलान्तर्गतं 'पेरुंपुलियूर' – नामकं द्वितीयं स्थलं, यत्र अर्चामूर्तिर्भगवान् स्वसङ्कल्पामिद्धां अर्चासम्बन्धिनीं व्यवस्थामतिलङ्घ्य प्रसादं दर्शयामास। अत्र भक्तिसारः भगवदालयान्तः प्रवेशाय अनुमतिं न लेभे। परं तु यदा सः बहिरेव आलयप्रदक्षिणमकरोत्, तदा अर्चामूर्तिर्भगवान् परिवर्तमानः यां दिशं स गच्छति तामेव पश्यन्नासीत्। आलयेषु अर्चारूपेण विराजमानस्य भगवतो महत्त्वं अर्चानां भगवदात्मकत्वं च सत्यं भक्तिसारस्य अन्येषां च द्राविडभक्तानां दिव्यप्रबन्धैः साधु प्रख्यापितम्। अथापि भक्तिसारः सर्वजनप्रत्ययार्हं सम्यक्तरां तत् प्रकाशयाभास।

भक्तिसारकृतौ द्वौ प्रबन्धौ। एकः "नान् – मुकन् तिरुवन्तादि" इत्याख्यायते। अपरः "तिरुच्चन्दविरुत्तम्" इति। आद्यः षण्णवतिगथात्मा। 'नान्मुकन्' (चतुर्मुखः) इति पदेन उपक्रमात् एवमस्य नाम। प्रथमगाथान्त्याक्षराण्यादाय अनन्तरगाथोपक्रमात् 'अन्तादि' रूपोऽयं प्रबन्धः। तत्र आदौ उपचारार्थश्रीशब्दपर्याय 'तिरु' शब्दघटनेन 'तिरुवन्तादि' इति व्यवहारः। द्वितीयः षड्विंशतिशत (१२६) गाथारूपः। वृत्तविशेषमनुसृत्य अस्य नामधेयं निष्पन्नम्।

श्रीमति अन्तादिप्रबन्धे श्रीमतो नारायणस्य परत्वं स प्रतिपादयति। स आह — "यस्य श्रीर्नास्ति तं परदेवतेति न मन्येध्वम्। "यदस्ति तत् सर्वं भगवानिति मतिर्यस्य नास्ति तेनाधीतं सर्वं निष्फलम्"। 'न कश्चिदन्यः भगवन्तं तथा वेद यथा अहं वेद"। "मदीयस्य परतत्त्वज्ञानस्य समुच्चिता अपि सर्वे दिव्यलोकाः न अर्धं भवितुमर्हन्ति।" इति। अस्य प्रबन्धस्य अन्ते आह – "अद्य त्वां जानामि ब्रह्मशिवयोरपि ईश्वर स्त्वम्। "अद्य त्वां जानामि ममेश्वरस्त्वम्। अद्य त्वां जानामि परममूलकारणं त्वम्।

यत् श्रुतं यच्च श्रोतव्यं तत् सर्वं त्वम्। अद्य त्वां सम्यक् जानामि नारायणस्त्वम्।" उपनिषदः पदे पदे उपसंहारं कुर्वन्ति "य एवं वेद" इति। तथाऽयं त्रिराह 'अद्य जानामि' इति। पुनश्च अवसाने आह — सम्यक् जानामीति। तदवधि यद् ज्ञानं दुर्लभमासीत् तदयं अनायासेन अन्तर्दृशा अलभत। "अद्य जानामि" इत्यत्र अन्यमभिप्रायं वदन्ति। "मतान्तरेषु एकैकमपि प्रविश्यायं परिचित्य तदनुसारिवृत्तिरासीत्। अन्ते तु भगवान् परतत्त्वमिति वेद। तेनाह — अद्य जानामीति इति। आद्येषु त्रिषु भक्तेषु अन्यतमः वेतालमुनिः अस्य गुरुरासीदित्यैतिह्यम्।

प्रबन्धान्तरे आदौ सङ्ख्याविशेषैः तत्त्वानि प्रतिपादयन्नयं सरलमतीनां दुर्ग्रहाभिप्रायो भवति। अथापि उपरि भक्तिरसस्यन्दिनीः उत्तमकाव्यरूपाः गाथाः निबध्नाति। "वेङ्कटाद्रौ अतिष्ठत्। परमपदे उपाविशत्। क्षीरसागरे शिश्ये। परं तु सर्वमिदं मम जन्मनः पूर्वम्। ततः परं तु सः अद्भुतः आदिभूतात्मा माधवः तिष्ठति उपविशति शेते च मदीये हृदये" इति वदति। ईदृशी तस्य भगवति भक्ति। संसारचक्रे परिभ्रमतां अस्माकं विषये तस्य आदेशः अयम्—यैः द्वारैः प्रसृत्य इन्द्रियाणि पापेषु प्रसक्तानि भवन्ति, तानि द्वाराणि निरुध्य गाढप्रेमात्मिकया भक्त्या इन्द्रियाणि ज्ञानमार्गसङ्गीनि कुरुध्वम्—इति। स पृच्छति— "भक्तिं विना को नाम सर्वेश्वरं द्रष्टुमर्हति ?" इति। स भगवन्तं प्रार्थयते – "विषयान्तरप्रवणं मे मनः यथा ततो निवृत्य भवच्चरणारविन्दचिन्तनैकपरायणं भवति तथा तदादिशेति"। अनुपदं भगवन्नामसङ्कीर्तनं निरन्तरं करवाणीति अभ्यर्थनां करोति। नेदं विस्मयाय यदयं भक्तिसारः अत्रैव परमपुरुषार्थं लेभे। अन्तिमगाथायां अयं गायति – तस्य आत्मा मुक्तः संवृत्त इति, नित्यमानन्दं अविन्दतेति च।

**तस्याः प्रसन्नेन्दुमुखः प्रसादं गुरुर्नृपाणां गुरवे निवेद्य ।
प्रहर्षचिह्नानुमितं प्रियायै शशंस वाचा पुनरुक्तयेव ॥ ६८**

प्रसन्नः मेघाच्छादनतुषारावरणादिविरहेण निर्मलः सम्यक् प्रकाशमानः इन्दुः चन्द्रः, स इव मुखं यस्य सः, प्रसन्नं हर्षेण विकस्वरं इन्दुतुल्यं मुखं यस्येति वा। नृपाणां राज्ञां, गुरुः गुरुतुल्यः, श्रेष्ठः, कर्तव्येषु मार्गदर्शी दिलीपः, तस्याः धेनोः, नन्दिन्याः, प्रसादं अनुग्रहं, वरदानं, गुरवे वसिष्ठमहर्षये, निवेद्य विज्ञाप्य, प्रहर्षचिह्नानुमितं प्रहर्षः वरलाभजनितः प्रमोदः, तस्य चिह्नं ज्ञापकं मुखविकासः तेन अनुमितं ज्ञातं, (तं प्रसादं) पुनरुक्तयेव पुनरुक्तिः ज्ञातज्ञापनं, एतद्रूपदोषवत्येव स्थितया, वाचा वचसा, प्रियायै कान्तायै सुदक्षिणायै, शशंस अवदत्।

यथापूर्वं तस्मिन् दिने वनात् निवर्तमानां नन्दिनीं प्रत्युद्गम्य पूजयन्ती सुदक्षिणा पत्युर्मुखे व्यक्तानि प्रहर्षचिह्नानि पश्यन्ती नूनं धेनुः प्रसादमकार्षीत् यतः महाराजस्य एवं प्रहर्ष इति अनुमिनोति स्म। अथापि तत् प्रति भर्तारं न पप्रच्छ, स्वयं स वक्ष्यति, तदवगमे न मया त्वरा प्रदर्शनीयेति स्वोचितं विनयं रक्षन्ती। दिलीपोऽपि प्रथमं गुरवे निवेद्य तदनन्तरमेव तस्यै वक्तव्यमिति मत्वा तदानीं किमप्यनुक्त्वा पूजावसाने आश्रमं प्रविष्टायां नन्दिन्यां महर्षेः सकाशमेत्य प्रणम्य वृत्तं विज्ञापयामास। तदनन्तरं स्वावासमुटजमागत्य सविस्तरं पत्न्यै अकथयत्।

भगवत इव दिलीपस्यापि गोपालत्वं महते उत्कर्षाय सम्पन्नमिति तस्मिन् स्वस्य बहुमानं व्यञ्जयन् कविः गुरुर्नृपाणामित्याह। यद्व वृत्तं तस्य योगदृष्टिबलेन महर्षिणा प्रागेव स्वयमेव कार्त्स्न्येन

ज्ञातत्वात् मर्यादापरिपालनाय केवलं प्रसादनिवेदनं तस्मै अकरोत्। सुदक्षिणायै पुनः अज्ञातज्ञापनं कृतवान्। श्रवणे अत्यन्तं कुतूहलिन्यै तस्यै लेशलेशमप्यविहाय सविस्तरं अकथयत्। एतद्-व्यञ्जनाय सविशेषमाह – प्रहर्षचिह्नेत्यादि। पुनरुक्तयेव न तु पुनरुक्तैव। हर्षलिङ्गैर्हि प्रसादो लब्धः इत्येतावन्मात्रमनुमितम्। तेन तन्मात्रे वाचः पुनरुक्तत्वं भवेत्। न तु महती परीक्षाकथा कथमपि ज्ञाता भवेत् विना वाचम्। अतो भूयिष्ठा वाक् अपुनरुक्तैव॥

**स नन्दिनीस्तन्यमनिन्दितात्मा सद्वत्सलो वत्सहुतावशेषम्।**
**पपौ वसिष्ठेन कृताभ्यनुज्ञः शुभ्रं यशो मूर्तमिवातितृष्णः॥ ६९**

अनिन्दितः निन्दितात् गर्हितात् अन्यः सर्वैः प्रशंसितः आत्मा स्वरूपं स्वभावो वा यस्य सः, सत्सु साधुषु, वत्सलः प्रेमवान्, सः दिलीपः, वत्सस्य तर्णकस्य हुतस्य होमस्य च शेषं अवशिष्टम्, वत्सपानानन्तरं दुग्धं यत् तस्य अंशमादाय होमे कृते यदवशिष्टं स्थितं तदित्यर्थः। मूर्तं मूर्तिमत्, देहबद्धं, शुभ्रं निर्मलं, स्वच्छं, यश इव स्वकीर्तिमिव (स्थितं), नन्दिनीस्तन्यं नन्दिन्याः धेनोः क्षीरं, वसिष्ठेन महर्षिणा, कृताभ्यनुज्ञः अनुमतः, अति अभ्यधिका तृष्णा पिपासा, तत्पानेच्छा यस्य तथाभूतश्च, (सन्), पपौ अपिबत्।

नन्दिन्याः सायन्दोहात् महर्षेः सायंहोमाच्च अनन्तरं, पूर्वं नन्दिन्यां यद् विज्ञापयामास – "वत्सस्य होमार्थविधेश्च शेषं गुरोरनुज्ञामधिगम्य मातः। ऊधस्यमिच्छामि तवोपभोक्तुम्" इति तद् तथा अकरोदित्यनेन श्लोकेनोच्यते। हन्त कियद् भाग्यं दिलीपस्य, येन नन्दिनीस्तन्यपानकृतं अत्यन्तपारिशुद्ध्यमवाप तस्य आत्मेति स्वकीयं भावविशेषं आविष्करोति कविः अनिन्दितात्मेति

तं विशिंषन् । महाराजः सन् दिलीपः यन्महान्तं नन्दिन्याराधन-क्लेशमनुबभूव तत्र निदानं सत्सु तस्य वात्सल्यम् । तेन सौराज्यस्य अविच्छेदे यत्नमकरोद् । उत्तरोत्तरं सौराज्ये सति हि सन्तः क्षेमवन्तः स्युः । एतत्फलानुकूलसन्तानसिद्धिहेतुत्वात् नन्दिनीस्तन्य-पाने तस्य अभ्यधिका तृष्णा । सफलव्रतानुष्ठानमेतत् तस्य अत्यन्तं यशस्करमासीदिति उत्प्रेक्षया व्यज्यते ॥

**प्रातर्यथोक्तव्रतपारणान्ते प्रास्थानिकं स्वस्त्ययनं प्रयुज्य ।**
**तौ दम्पती स्वां प्रति राजधानीं प्रस्थापयामास वशी वसिष्ठः ॥ ७०**

वशी जितेन्द्रियः, वसिष्ठः महर्षिः, प्रातः प्रभाते, यथोक्तव्रत-पारणान्ते यथोक्तस्य पूर्वोक्तस्य व्रतस्य गोपरिचरणाङ्गभूतयमनियम-परिग्रहस्य सम्बन्धिनी या पारणा 'केशसँस्कारादिपूर्वकसुस्नान-मिष्टान्नभोजनादिरूपा समापनक्रिया, तस्या अन्ते अवसाने, यथो-क्ता शास्त्रोक्ता या व्रतपारणा तदन्ते, इति वा, प्रास्थानिकं प्रथान-काले कर्तव्यं, स्वस्त्ययनं, येन स्वस्ति सुस्थितिः, सुखजीवनं, प्राप्यते तद् स्वस्त्ययनं, आशीर्वाद इति भावः, तत्, प्रयुज्य कृत्वा, तौ दम्पती जायापती सुदक्षिणादिलीपौ, द्वितीयाद्विवचनमिदम् । स्वां स्वकीयां राजधानीं आवासभूतप्रधाननगरीं प्रति, तत्र गमन-मुद्दिश्य, प्रस्थापयामास प्रस्थानं कारयामास । बहूनि दिनानि अत्र आश्रमे वसतोर्गतानि । राज्यकार्याणि बहूनि भवेयुः । अतः गम्यतामित्यादेशमकरोत् । तदा "राजधानीं गतयोः सुखप्रसवः, सुपुत्रजननं आरोग्यं राष्ट्रे योगक्षेमादिकं च भूयादिति आशिषं च प्रायुङ्क्तेत्यर्थः ॥

---

पत्रं फलं दृढतरं गुणजालमस्थि काण्डं शिफा बहुविधं विटपादिकं च ।
अङ्गं त्वदीयमखिलं भुवनोपयुक्तं हे केर केरलसुरद्रुरसीति सत्यम् ॥

ए.वि. कृष्ण वारियर्

VERIFIED 193..
R.S... 039878 LIBRARY TIRUPATI

## प्रकृतिभेदः ।

गृहिणी— उत्तिष्ठ रे पूर्णक । अस्माकमुत्थितानां कियच्चिरमभूत् । अद्यापि त्वं शेषे । न भक्तिर्भयं वा ।

भर्ता— कुत एवं प्रबोधयसि । निद्रातु कामम् । उत्थास्यति यदा प्रबुध्यते । का त्वरा ।

प— अस्मासु उत्थितेषु किं कर्मकराः स्वप्तुमर्हन्ति ?

भ— प्रबुद्धैः तैः सम्प्रति किं कर्तव्यम् ? धनुर्मास इति भगवदाराधनं प्रत्यूष एव कर्तव्यमिति वयं अस्मिन् अपररात्रे तिसृषु घण्टासु उत्थितवन्तः स्मः । तेषां इदानीमेव प्रबुद्धानां कर्तव्यं किमपि नास्ति । कुतो न स्वप्तुमर्हन्ति कञ्चित् कालम् ?

प— न मे तद्युक्तं भाति यत् यजमानेषु प्रबुद्धेषु कर्मकराः स्वपन्ति ।

भ— कामं तथा । परं तु तादृशः समयोऽन्यः । अद्य तु अयं अस्मासु शयितेषु बहु कर्म कृत्वा श्रान्तः गाढं निद्राति । न जाग्रत् शेते । यदि जाग्रत् शयीत तर्हि तत्र अस्ति मर्यादातिक्रमप्रसङ्गः । अद्य तु अस्माभिः दयमानैर्भवितव्यम् ।

## सुभाषितम् ।

ऊधसि दुग्धे सत्यपि मृगयति मशकोऽसृगेव पानाय ।
प्रकृतिरियं क्षुद्राणां न शक्यते ब्रह्मणाऽपि वारयितुम् ॥

ए. वि. कृष्णवारियर्

सम्पन्नं द्रविणं प्रिया सहचरी भूयोनुकूलाः सुताः
स्वारोग्यं च वपुः श्रुते च विनये शिष्या विशिष्यातुलाः ।
भक्तिः श्रीमति वासुदेव उदिता दानावदातं यशो
वाक् पीयूषरसा तथाऽपि मनुजास्तृप्ता नहीत्यद्भुतम् ॥

डि. श्रीनिवासाचार्यः

## उपकारिणो विद्वांसः

श्री कारप्पङ्गाडु वेङ्कटाचार्यः
श्री व. न. श्रीरामदेशिकाचार्यः
श्री उडालि सुब्बरामशास्त्रिप्रधानाः
श्री ए. राधाकृष्णमूर्तिः
श्री चिलुक्कूर् वेङ्कटाचार्यः
श्री व. कृ. शेषाद्र्याचार्यः
नेल्लूर् वेदसंस्कृतपाठशाला-
[ध्यापकाः

## Editorial Board Members

Sri Vidyalankara V. R. SRINIVASA TATACHARYA,
Vyakarana, Sahitya, Visishtadwaita Siromani.
„ D. T. TATACHARYA, Siromani, M. O. L.,
„ V. S. V. PATRACHAR Sirom,.yaani

अस्मत्प्रतिनिधी—

**Sri V. S. Ranganathan, M. A., B. O. L.,**
त्रिदण्डिमठ - दारागञ्ज, ALLAHABAD.
„ **D. Srinivasacharya,** Siromani,
17/7, Sadam Wadi, Bhandup, Bombay-78



ditor & Publisher :

**D.T. Tatacharya,** Siromani, M.O.L ,
113, G. South Mada Street, Tirupati (A.P)

## PATRONS.

अहोबिलमठ श्री सन्निधिः ।

वानमामलै मठ श्रीस्वामिचरणाः ।

श्रीमत् आण्डवन् सन्निधिः ।

परकालमठ श्रीसन्निधिः ।

,, Raja Bahadur S. Aravamudu Iyengar. B. A., B. L. M. B. E.

,, Justice S. Varadachariyar, B. A., B. L.,

,, A. Srinivasa Iyengar, Mannargudi.

,, R. Gopalaswami Iyengar, Advocate, Madras.

,, K. Srinivasa Iyengar, Madurai.

,, J. Subramaniam, Advocate, Gopichettipalayam.

,, S. T. G. Varadacharyulu, Chittigudur.

,, M. Sankar Lal, Tirupati.

,, N. S. Chari, Bombay.

,, Seth Govind Babu Bangur, Calcutta.

,, T. V. Visvanatha Aiyer, Mylapore, Madras.

,, N R. Srinivasa Iyangar, Madras.

,, K. Venkatachari, Bombay.

---

To

Sri ______________________________

______________________________

______________________________

---

Pirnter - J. Radhakrishnan,
R. K. Press, Tirupati.

R K. Press, Tirupati. Copies 350.